# ॥ दशमः सर्गः ॥

॥ श्रीगणेशाय नमः ॥

अथ दशमस्सर्गः प्रारभ्यते –

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च लब्धपाराः ।
स्वयंवरं शम्बरवैरिकायव्यूहश्रियः श्रीजितयक्षराजः ॥१॥

अथ स्वयंवरारम्भः । अथ कुमारा राजपुत्राः स्यन्दनैः कृत्वा स्वयंवरमायाताः । कीदृशाः? । कुलजाः सूर्यसोमादिप्रसिद्धान्वयाः शस्त्रेषु खड्गादिषु शास्त्रेषु व्याकरणादिषु च लब्धपारा दृष्टपरिसमाप्तय इति । क्षत्रियाणां वृत्तेः शस्त्रमूलत्वात् मुख्यतया तन्निर्देशः । शस्त्राणामपि विद्यामूलत्वात् शास्त्रशब्देनैव तेषु लब्धेषु पृथगुपादानं तच्छास्त्रोपदेशस्यानुभवप्राप्त्यर्थम् । केषामपि हि शस्त्राणामभ्यासेऽपि तदुपदिष्टानामर्थानां सम्यगनुभवो न भवति । शम्बरवैरी कामस्तस्य [195.a] कायव्यूहो बहुदेहकरणं तस्यैव श्रीः शोभा येषां ते तथा । सर्वेषां नवयौवनालङ्कृत मनोहरदेहत्वादनेकाः मूर्तीः कृत्वा क्रीडतः कामस्य विभ्रमो येषु दृष्टेषु भवतीति भावः । तथा श्रिया धनसम्पदा कृत्वा जितो यक्षराट् कुबेरो यैरिति निःशेषवरगुणविशेषसूचनम् ॥१॥

-दृ-

नाभूदभूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः ।
नास्यादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु[1] ॥२॥

तस्मिन् व्रजे कुमारादिसमूहे स्वयंवराय व्रजति सति, स्मरसायकानामभूमिरविषयो नाभूत् । स्वर्गे मर्त्ये पातालेऽपि प्रायः सर्वे लोकाः स्मरशराणां लक्ष्यभावत्वं गता इत्यर्थः । किञ्च । कुलजः कुमारः कोऽप्यगन्ता नासीत् । अपि तु कुलीना नृपपुत्राः सर्वेऽप्यागताः । अन्यच्च धरणेः कश्चन देशो विभागोऽपन्था वा न जातः । अपि तु धरण्यामितस्ततः सहस्रं मार्गा जाता । इति स्वयंवरप्रस्थितविविधजनबाहुल्योक्तिः ॥२॥

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्तुम् ।
द्रष्टुं परैस्तामनुरोद्धुमन्यैः स्वमाप्रशेषाः ककुभो बभूवुः ॥३॥

दिशां प्रदेशाः सर्वे रिक्ता जाताः । कैः कैः कृत्वा । योग्यैरर्हैः पात्रभूतैः । किं कुर्वद्भिः । नृपजां वरीतुं विवाहयितुं व्रजद्भिः । अनर्हैरयोग्यैर्वीरैः प्रसभेन बलात् हर्तुं व्रजद्भिः । परैर्योग्यायोग्यैर्द्रष्टुमेव व्रजद्भिः । अन्यैर्गोत्रादिसंबन्धादिना विवाहानर्हैस्तां नृपजां अनुरोद्धुं[2] रक्षितुमेव । व्रजद्भिरिति सर्वत्र संबन्धः । तान्प्रतिकर्तुमिति पाठे व्यवहाराच्चलितान्वारयितुमिति व्याख्येयम् ॥३॥

1. B. S. व्रजेषु. 2. B. S. प्रतिकर्तुं.

लोकैरशेषैरवनेः श्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे।
स्ववर्तिनस्तज्जनयन्त्रणार्त्तिविश्रान्तिमापुः ककुभां विभागाः ॥४॥

दिशां विभागाः प्रदेशाः। स्वस्मिन् वर्तन्ते तिष्ठन्तीत्येवंशीला ये, ते ते बहुविधा जनास्तेषां यन्त्रमाक्रमणं तेन तस्य वा या अर्तिः पीडा ततो विश्रान्तिः समुच्छ्वासलक्षणा तामापुः। क्व सति?। समस्तैर्दिग्भवैर्जनैस्तां भूमेर्लक्ष्मीमनुसंधाय प्रस्थाने विहिते सति। गुरुतर-भारस्योत्तारितत्वात् विश्रान्तिः श्रमाभावः ॥४॥

तलं ययेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः।
भैमीं सलब्धामिव तत्र मेने यः प्राप भूभृद्भवितुं पुरस्तात् ॥५॥

यथा विकीर्णा एव विक्षिप्तास्तिलास्तलमधोभागं नेयुर्न प्रापुः। [तथा वथा ऽभावि]-महीमहेन्द्रैः" इति पाठे राजभिः कृत्वा पथा मार्गेण तथा जातं तथा संकीर्णेन भूतम्। किं बहुनोक्तेन। यो भूभृत्तत्राग्रे भवितुं लेभे स भैमीं प्राप्तामिव मेने ॥५॥

नृपः पुरःस्थैः प्रतिबद्ध-[१५५. ८]-वर्त्मा पश्चात्तनैः कश्चन नुद्यमानः।
यन्त्रस्थसिद्धार्थपथाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥६॥

कश्चन नृपोऽध्वनि वर्तमानो यन्त्रस्थसिद्धार्थपदस्थितोऽपि आत्मानमसिद्धार्थमम-न्यत। यन्त्रे तिलपीलनोपकरणे स्थिता ये सिद्धार्था धवलसर्षपास्तेषां पन्थास्तत्र तिष्ठति यः स तथाभूतोऽपि सन्। विरोधोऽयम्। य एवंभूतः स कथमध्यन्यसिद्धार्थो-ऽसर्षपरूपो भवेदिति च्छलेनार्थः। तत्त्वतस्तु असिद्धार्थमक्षतकार्यं प्राप्तमरणसन्देह-त्वात्। यतः कीदृशः?। पुरस्तिष्ठन्तीति पुरःस्थास्तैरेव गृहीतं रुद्धं वर्त्म यस्य स तथा। पश्चाद्भवाः पश्चात्तनास्तैर्नुद्यमानः प्रेर्यमाणः सन् ॥६॥

राज्ञां पथि स्त्यानतयानुपूर्वीविलङ्घनाशक्तिविलम्बभाजाम्।
आयानसंज्ञानमिवात्तकम्पैर्ददुर्विदर्भेन्द्रपुरीपताकाः ॥७॥

स्वयंवरमहोत्सवायोच्छ्रितविविधपताकं भीमपुरं त्वरितमागच्छतां राज्ञां दृष्टिपथमव-तीर्णमिति भङ्ग्या वर्णयति। कुण्डिनकेतुवसनाञ्चलानि आत्ता गृहीता ये कम्पाः कर-हरितानि तैः कृत्वा त्वरितमागन्तुं राज्ञां संज्ञानं संज्ञामिव ददुः। यतः कीदृशी मार्गेऽ-तिघनत्वेन आनुपूर्वी परिपाटी तस्या विलङ्घनमतिक्रमणं तत्र या अशक्तिरसामर्थ्यं तेन कृत्वा विलम्बं कालक्षेपं भजन्तीति तेषाम्। तथा संज्ञाऽत्र चेष्टयार्थसूचनम्। अन्यापि कापि युवती केषामप्यभीष्टानां पथि जनसङ्कुलतया विलम्बभाजां दृष्टिपथमव-तीर्णानां त्वरितमित आगम्यतामिति करपल्लवेन वस्त्राञ्चलेन वा संज्ञां ददाति ॥७॥

प्राभूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः।
भुवस्तले कुण्डिनगामि राज्ञां तद्वासुकेश्चाश्वतरोऽन्वगच्छत्।

भुवस्तले पृथ्वीपृष्ठे पाताले च यत्कुण्डिनगामि सकम्बलमुच्चैर्नागानां बलं कर्कोटकः प्राभूय पुरः स्थित्वाऽचकर्ष आंच्छति स्म, लोकोक्त्या खाञ्चति स्म। तन्नागबलं राज्ञां वासुकेश्चाश्वतरोऽन्वगच्छदिति श्लेषः। श्लेषभङ्गस्त्वेवं नागानां गजानामुच्चैरुन्नतं, पक्षे नागानां सर्पाणामुन्नतैः प्रसिद्धम्। उपरिगामित्वाद् वा उच्चतम्। सह कम्बलेन कुथेन वर्तत इति सकम्बलं गजबलम्। सह कम्बलेन कम्बलनाम्ना सर्पेण सकम्बलं सर्पबलम्। कर्कः श्वेतोऽश्वः अटकोऽटनशीलः पुलाङ्गितिकुशलः। पक्षे कर्कोटको नाम सर्पः। प्रकृष्टोऽश्वोऽश्वतरो वाजिरत्नम्। स हि पल्ययनरत्नपल्यानितः सन्नाकृष्यमाणः पश्चाद् गच्छतीति स्थितिः। अटनशीलस्य यथा-[११६-a]-वाटकोऽग्रे क्रियते। यो लोके वटवहा नाम्ना प्रसिद्धः। पक्षे त्वश्वतरो नाम नागः। शक्तिमत्त्वाद् रक्षां कुर्वन् पृष्ठानुगामी ॥८॥

आगच्छदुर्वीन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः।
विस्पष्टमाचष्ट हरिद्वधूनां रूपं पतित्यागदशानुरूपम्॥९॥

आगच्छतामुर्वीन्द्राणां राज्ञां चमूभ्यः सकाशात् समुत्थैः समुत्थापितैर्भूरेणुभिः पाण्डुरिता पाण्डुरीकृता सती हरितो दिश एव वध्वस्तासां मुखश्रीरास्यच्छाया पतित्यागस्य दशाया अवस्थाया अनुरूपं योग्यं रूपमाकारं विस्पष्टमतिस्फुटमाचष्टाऽकथयत्। पतिभिस्त्यक्तानां वधूनां मुखमवश्यं पाण्डुरितत्वात् विच्छायं भवति। हरितां च पतयो राजानः सन्त्येव, ताः परित्यज्य दमयन्तीवरणाय देशान्तरवर्तिभीमनगरमुपागताः। तत्त्वतस्तु हरितां मुखं प्रारम्भो यतस्तासां प्राच्यादिर्व्यवहारः ॥९॥

आखण्डलो दण्डधरः शिखावान्पतिः प्रतीच्या इति दिग्महेन्द्रैः।
भैम्यैव बध्वा स्वगुणेन कृष्टैः स्वयंवरे तत्र गतं न शेषैः ॥१०॥

इन्द्रो यमोऽग्निर्वरुण इत्येतैरेव दिगधिपैस्तत्र स्वयंवरे गतं न शेषैः षड्भिः तेषामनागमने च पुरो हेतुरुद्भावयिष्यते। उत्प्रेक्षते। दमयन्त्यैव स्वगुणेन बध्वा कृष्टैर्निजसम्मुखमागमितैः। ते हि दमयन्तीतोऽतीव दूरवर्त्ति(र्ति)नः। अन्योऽपि दूरवर्ती गुणेन रज्ज्वा बद्ध्वा कृष्यते। तत्त्वतस्तु भैम्या गुणः सौन्दर्यादिः। आकर्षणमुच्चारणादिमन्त्रकृतः स एवात्राकर्षणं लघुवत्त्यैव तेषामागतत्वात् ॥१०॥

मन्त्रैः पुरं भीमपुरोहितस्य तद्बद्धरक्षं विशति क्व रक्षः।
तत्रोधमं दिक्पतिरातताान यातुं ततो जातु न यातुधानः ॥११॥

अन्येषां दिक्पतीनामनागमने हेतुं दर्शयति। भीमस्य यः पुरोधा वेदविधिज्ञस्तस्य मन्त्रै रक्षोहणसूक्तैः बद्धा रक्षा सर्षपादिगर्भा पीतसूत्रपोटलिका यत्र तत् पुरं रक्षः कर्तृ क्व विशति कस्मिन् प्रदेशे भूत्वा संचरति। अपि तु रक्षोघ्नैर्वेदसूक्तैर्भीमपुरोधसा सूत्रबन्धपुरःसरकृतरक्षत्वात्, तत्र रक्षसः क्वापि प्रवेशावकाशो नास्त्येवेत्यर्थः। तेन हेतुना यातुधानो दक्षिणपश्चिमदिगन्तरालवर्ती नैर्ऋतो जातु कदाचिदपि तस्य पुरस्याभिमुखं यातुमुधमं नैवाततान ॥११॥

कर्तुं शशाकाभिमुखं न भैम्या मृगं दृगम्भोरुहतर्जितं यत्।
अस्या विवाहाय ययौ विदर्भांस्तद्वाहनस्तेन न गन्धवाहः ॥१२॥

गन्धवाहो यत्कारणाद् भैम्या दृगम्भोरुहाभ्यां नयननलिनाभ्यां तर्जितं पराभूतं मृगमभिमुखं कर्तुं न शशाक। भैम्या पुरोऽभिमुखं मुख्यत्त। तेन हेतुना [196.6] भैम्या विवाहाय विदर्भनाम्नो जनपदान्न यातः। कीदृशः स एव मृगो वाहनं यस्य स तथा। तस्यान्यद्वाहनं नास्ति। वाहनं विना कथं यातु ॥१२॥

जातौ न वित्ते न गुणे न कामः सौन्दर्य एव प्रवणः स वामः।
स्वच्छस्वशैलेक्षितकुत्स्यबेरस्तां प्रत्यगान्न स्त्रितमां कुबेरः ॥१३॥

कामो लौकिकव्यवहारात्तु अपरव्यवहारेऽतो जातौ ब्राह्मण्यादौ वित्ते नानाविधे धनसंचये कुले भृगुवसिष्ठादिगोत्रे न प्रवणो नैवासक्तोऽयमितरलोकवत्। अन्ये हि लोका विवाहादावेतत्त्रयं मुख्यतया कीक्षन्ति। तर्हि स क्व प्रवण इत्याह। सौन्दर्ये केवले लावण्य एव स प्रवणः। कामः सौन्दर्यदासस्ततस्तदादेशेन तद्गृहे पानीयमपि भरति। यतः एवं ततः स्वच्छे अत्यन्तनिर्मले स्वशैले कैलासे आनखशिखाग्रं दृष्टं कुत्स्यं कुत्सार्हं बेरं शरीरं येन स तथाविधः सन् तां स्त्रितमां प्रकृष्टस्त्रियं प्रति नागान्नागतः। कामवशाद्धि युवती यूनि समनुरज्यते। स च तां तत्रैव समादिशति। यत्र सामान्येन सौन्दर्यं भवति, तच्च मयि नास्तीति विमृश्य दृश्येतरवपुर्धनदस्तद्वरणाय गन्तुं पदं नाददात्। स कुबेरः, सा च स्त्रितमेति विशेषणयोः साभिप्रायत्वां दूरमयोग्यतां सूचयति। प्रकृष्टा स्त्री स्त्रितमा। तामपरस्थे ह्रस्वः। कुबेरशैलस्य स्वच्छत्वे प्रसिद्धेऽपि स्वरूपकथनं विशेषद्योतनार्थम् ॥१३॥

भैमीविवाहं सहते स्म कस्मादर्धं तनुर्या गिरिशस्य गौरी।
ध्रुवं न यान्त्या विदधे विदर्भानीशानयात्राय तयान्तरायः ॥१४॥

दिक्क्रमप्राप्तं भगवत ईशानस्यागमनाभावहेतुं सम्भावयति। भगवत्यष्टमूर्तावष्टगुणैश्वर्यपात्रभूते भूतेश्वरे तत्रानागमने[1] हेत्वन्तरं न सम्भवति। तस्मादयमत्र हेतुः। यका भगवती गौरी गिरिशस्य परमैष्ठिकस्यापि सतो निजगुणगरिम्णा गौरत्वाधीति,[2] तेन कृत्वाऽर्धं तनु समविभागेन देहार्धभूता सा तस्य भैमीविवाहं कस्मात् सहते स्म? अपि तु केनापि हेतुना न क्षमते स्म। नूनं तया गौर्या न यान्त्या विदर्भान् प्रति यदीशानस्य दिक्पतेर्यद्धानं प्रस्थानं, तस्मै विघ्नः कृतः। भगवतो हि वामाङ्गमर्धं गौरी तस्यास्तावद् भैमीवरणेऽनधिकार एव। दक्षिणाङ्गार्धस्य तु गौरीतोऽपि रूपेण विशिष्टां ज्ञानदृष्टिदृष्टां दमयन्तीं प्रति भगवान् शम्भुश्चचाल तस्य तु चलनाभावेऽयमुक्तो हेतुः। तदा भगवतोऽर्धनारीश्वरस्यातीव युगपच्चलाचलत्वमभूदित्यर्थः ॥१४॥

स्वयंवरं भीमनरेन्द्र-[१५७.a]-जाया दिशः पतिर्न प्रविवेश शेषः।
प्रयातु भारं स निवेश्य कस्मिन्नहिर्महीगौरवसासहिः कः[3] ॥१५॥

शेषो नामाधोदिक्पतिर्भैम्याः स्वयंवरं न प्रविष्टः। यतः स भारं गौरवलक्षणं प्रसिद्धम्। कस्मिन् विषये [अधिकरणे] निवेश्य प्रयातु। ननु तक्षकप्रभृतयः प्रभूता भुजगाः सन्त्येव। तद्दिनाणि दिनानि नियोगे तदन्यतमे निक्षिप्य किमिति[4] न प्रयातीत्याह। अन्यो भगवतः शेषात् पृथग्भूतो महीं सासहिः, पृथ्वीं सोढुं कः क्षमः। खल्वहिरस्ति, अपि तु न कोऽपीत्यर्थः। अत्यर्थं सहते सासहिः। निपातोऽयम्। महीभारं कस्मिन्निवेश्य प्रयातु यः सर्पः सासहिः सहनशील इति वा व्याख्येयम्। प्रयातु भारं स निवेश्य कस्मिन्नहिर्महीगौरवसासहिर्यः इति क्वापि पाठः। तदा तस्मिन् कस्मिन् भारं निवेश्य प्रयातु योऽहिर्महीगौरवसासहिरिति व्याख्येयम् ॥१५॥

स्वयं विमृश्यैव स धर्मशास्त्रं स्वयंवरं प्रास्थित न स्वयंभूः।
व्यलोकि लोके श्रुतिषु श्रुतो वा समं विवाहः क्व पितामहेन ॥१६॥

स स्वयं ब्रह्मा धर्मप्रधानं शास्त्रं स्मृतिनाम स्वयमेव विमृश्यानधिकारितया स्वयं न प्रास्थित, न प्रस्थितः। ननु धर्मशास्त्रे कथं तेनानधिकारिता दृष्टेत्याह। पितामहेन पितुः पित्रा समं विवाहो लोके भुवने जने वा मुनिभिर्वसिष्ठ[5]गौतमादिभिः क्व विलोकितः क्व वा श्रुतः।

1. B1 तत्रावामनात्र. 2. B1 om. तेन --- तनु. 3. B1, 8 यः. 4. 8 किमपि.
5. 8. - विशिष्ट -

अपि तु नैवं क्वापि दृष्टो, न च श्रुतः। श्रुतिषु च द्विविध एवार्थो निबद्धोऽस्ति दृष्टः। श्रुति-श्चादृष्टश्रुते हि परस्परप्रमाणभूते पितामहः पितृपिता। तत्त्वतस्तु भगवान् स्वयंभूर्लक्षणया पितामहः सर्वज्येष्ठत्वात् ॥१६॥

भैमीनिरस्तं स्वमवेत्य दूतीमुखात् किलेन्द्रप्रमुखा दिगीशाः।
स्यदे मुखेन्दौ च विलम्ब्य मान्द्यं चिरस्य ते[1] राजसमाजमीयुः ॥१७॥

श्रुत्वा निजं भीमजया निरस्तं दूतीमुखादिन्द्रमुखाः, तेषां त्रिभुवनजनयावद्वृत्तवृत्तान्त-साक्षात्कृति कृतिनामपि दूतीमुखश्रवणादिवर्णनं कविसमयसमालोपवशात्। स्थूलं सूक्ष्मं च द्वयमपि कविसमये दृश्यते। यथा रामायणे हनूमतः शतयोजनप्रमाणस्य समुद्रस्य लङ्घने स्थूलदृष्ट्या तावन्महिमा वर्णितः। तथाऽर्धनिमेषमात्रेण द्रोणाचलसमानयने तु सूक्ष्मत्वमेव एवमन्यत्र। इन्द्राद्या दिक्पतयो निजनिजदूतीमुखात् निजमात्मानं भीमजया निरस्तं निराकृतं श्रुत्वा स्यदे वेगे मुखेन्दौ च चन्द्रसमे वदने मन्दत्वमधिकीकृत्य निरर्थकत्वात् चिरेण विलम्ब्य नृपवृन्दमागताः। स्यदे मान्द्यं मन्दगामित्वं, मुखे च मान्द्यं विच्छायत्वम्। निजशब्दः प्रायेणात्मीयार्थे द्र-[११७.८]-व दृश्यते, न त्वा-त्मार्थः। तच्च सहृदयैर्विमृश्यम्। अथवा दूतीमुखान्निजमात्मीयं निरस्तं निरसनं श्रुत्वेति व्याख्येयम्। तदा निरसनं निरस्तमिति नपुंसके भावे क्तः। भीमजया करण-भूतयेति च ॥१७॥

नलभ्रमेणापि वृणोति भैमी कदाचिदस्मानिति शेषिताशा।
अभूत्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदपूर्वरूपा[2] ॥१८॥

~~कापि~~ कदाचिद् दैवयोगात् नलभ्रान्त्यापि वृणोति यदि न तत्त्ववृत्त्या एवमुद्धारिताशं सा सती महेन्द्रादीनां चतुष्टयी ~~कापि~~ काचिदपूर्वरूपा मिथ्याकारापि चतुर्नली सम्पन्ना। अलीकं मायापरिकल्पितं रूपं सौन्दर्यं यस्या इति वा। अत एव काचिदपूर्वा। आपात-मात्रेण हि कृत्रिममलीकमनोहरमवभासते। चतुर्णां नलानां समाहारश्चतुर्नली ॥१८॥

पयस्यतां तद्भवितुं सुराणां पृष्टेन दृष्टेन परस्परेण।
नैवानुमेनेऽनलसाम्यसिद्धिः स्वाभाविकात्कृत्रिममन्यदेव ॥१९॥

तद्भवितुं प्रयस्यतां प्रयासं कुर्वतां सुराणामनलसाम्यसिद्धिर्नैवानुमेने नानुजज्ञौ। अनलसाम्यसिद्धिर्भवितुं न ददातीत्यर्थः। अनलसिद्धिरेव दृश्यत इति भावः। अनुमतिर्हि कर्तुमिच्छतोऽनुज्ञा अनलसिद्धिश्च तां न ददाति, अपि तु नैवं भवतेति निषेधति।

1. B. om. तेषां ---- दूतीमुख 2. B., काचिदलीकरूपा.

यदि हि सानुमन्येत भवत यूयं नला इति तदा न पुनः पुनरात्मानं प्रदर्शयेत्। तथा हि पुनः पुनः सम्पूर्णभावेनाविर्भवन्त्या ते नलीभवन्तो[1] निषिद्धा एव। यथा कमपि कमपि कार्यं चिकीर्षुं कश्चनान्तरा स्थित्वा विषेधति नैवं कर्तव्यमिति। केन प्रयस्यतां परस्परेण। कीदृशेन दृष्टेन वीक्षितेन पृष्टेन। एक एकेन प्रथममात्मानं दर्शितः पश्य मामहं नलवत् चारुरस्मि न वेति अथवा पूर्वं प्रश्नः, पश्चाद् दर्शनम्। भोः पश्य मामिति प्रश्न एव अहं चारुरस्मीति प्रश्नक्रियायाः कर्मप्रश्नदर्शनयोर्भूयो भूयः क्रियमाणत्वात् प्रयासे करणत्वम्। अथवा विशेषणतृतीयेयं प्रश्नदर्शनविशिष्टा एव ते नलीभवितुं प्रयासं कुर्वन्तः सन्ति। युक्तोऽयमर्थो यन्नलसाम्यसिद्धिर्नानुमतिं ददौ। यतः स्वाभाविकात् सहजसिद्धात् सकाशात् कृत्रिममौपाधिकमन्यत् पृथगेव। तदेव स्वाभाविकं कृत्रिममिति नास्त्येवेत्यर्थः। नलेन साम्यं नलसाम्यं, तस्य सिद्धिर्निष्पत्तिर्नलसाम्यसिद्धिर्नलसदृशभवनं पञ्चानां सम्बन्धः। 'नलसाम्यसिद्धिर्नैवानुमेने' इति व्याख्याने तु नलसाम्यं यदा स न भवति, तदाऽनुमतेरभाव एव यो ह्यनुमतिं ददाति स प्रकटीभूय ब्रवीत्येव [।५४.५] एवमस्त्विति। यदि न प्रकटीभूय ब्रवीति तदा तस्यामननुमतिरेव। एतच्च व्याख्यानस्य पक्षद्वयं विमृश्य यद् घटमानं भवति तदुपादेयम्। नद् भवितुमिति असः स भवितुं नद्-भवितुमिति च मत्यर्थः ॥१९॥

पूर्णेन्दुमास्यं विदधुः पुनस्ते पुनर्मुखीचक्रुरनिद्रमब्जम्।
स्ववक्त्रमादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथातिमञ्जु ॥२०॥

तमेव नलीभवनप्रयासं दर्शयति। ते देवा पुनः पूर्णमिन्दुं निजमास्यं विदधुः पुनरनिद्र-मब्जं निजमुखीचक्रुः। अथ पश्चात् निजमुखं मुकुरमण्डले दृष्ट्वा दृष्ट्वा बभञ्जुः। यत्कारणात् तथा प्रायेण नातिमञ्जु, अत्यन्त रुचिरं[2] न। पूर्णेन्दुमिव पूर्णेन्दुम्। अनिद्राब्ज-मिवानिद्राब्जम्। अनिद्रमब्जं चास्यं चक्रुरित्येतावतैव सिध्यति। अब्जं मुखीचक्रुरिति तु वाक्यद्वयस्य स्वप्राधान्यादुक्तिप्रत्युक्तिभङ्ग्या निर्देशः। स्ववक्त्रमिति[3] तथैव।

अथ चार्थान्तरम् – स्वमुखं[4] मुष्टिप्रहारैर्बभञ्जुर्हत्वा चोरयन्ति स्म। वैमत्यात्। अन्यस्यापि वैमत्येन प्रवृत्तस्य मुखभङ्गो युज्यते। एते स्वतिवैमत्येन प्रवृत्ताः सन्ति। तेषां तु प्रभुत्वादन्येन मुखभङ्गः कर्तुं न शक्यतेऽतो हेतोस्त एव स्वमुखस्यानुमति प्रविशतो भङ्गं चक्रुः। साक्षादेव पूर्णमिन्दुमनिद्रमब्जमास्यं विदधुर्मुखीचक्रुरिति वा।

---

1. B. नलीनवान्ता 2. B. अर्थे – रुधिरं 3. B. स्ववक्तु – 4. B. स्वमुखे: –

एतादृशं च कर्म देवानां धत्त एव । आपातमात्ररमणीयाः कवीनामालापाः परमार्थविचारं न सहन्ते ॥ २० ॥

प्रियावियोग[1]ज्वरितादैलाच्चन्द्राच्च राहुग्रहपीडितात्ते ।
ध्मातात्च सारैर्मदनात् गृहीतैर्नलानुकल्पं स्वमकल्पयन्त[2] ॥ २१ ॥

उत्प्रेक्षते । ईदृशादीदृशादेतस्मादेतस्माद् गृहीतैः सारैः कृत्वा ते स्वमात्मानं नलानुकल्पं नलसदृशमिवान्व[3]कल्पयन्त रचयन्ति स्म । कस्मात् कीदृशादित्याह । प्रिया उर्वशी दिव्यस्त्री, तस्या वियोगः पुराणप्रसिद्धस्तेन ज्वरितात् सन्तप्तादैलात् पुरूरवसो नृपात् राहुग्रहपीडिताच्च चन्द्रात् । मदनाच्च ध्मातादु वह्निसंयोगपीडितात् प्रकारत्रयेण च सारग्रहणं प्रसिद्धमेव । मुख्यः स्यात् प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः ॥ २१ ॥

तेषां तदा लब्धुम(म)नीश्वराणां श्रियं निजास्येन नलाननीयाम् ।
नालं तरीतुं पुनरुक्तदोषं [4]बर्हिर्मुखानामनलाननत्वम् ॥ २२ ॥

[5]बर्हिः मुखं येषां ते बर्हिर्मुखाः । अग्निमुखा देवास्तेषामनलाननत्वं कर्तृ पुनरुक्तदोषं तरीतुं त्यक्तुं नालं, न समर्थम् । पुनरुक्तमिव पुनरुक्तं स एव दोषः । एकस्यैव वर्णस्य पदस्य वाक्यस्य वा गुणविशेषार्थान्तरं विना यद्द्विस्त्रिरुच्चारणं तत्पुनरुक्तम् । तद्वैवैकमेव वस्तु यद्द्विस्त्रिर्दृश्यते तद-[११४.७]-पि पुनरुक्तमित्युच्यते । स च दोषः । अत एव बर्हिरनलो मुखं येषां ते बर्हिर्मुखाः । अनलो वह्निराननं येषां तेऽनलाननाः तेषां भावोऽनलाननत्वम् । ते बर्हिर्मुखा अनलाननाः प्रथमत एव सन्ति । पुनरपि चानला-ननाः भवन्तीति विशेषाभावे पुनरुक्तदोषोऽयम् । बर्हिःशब्देनानलशब्दो गतार्थः मुखशब्देन चाननशब्दः । कीदृशानां तेषामिति पुनरुक्तदोषसम्भवमाह । तस्मिन्नवसरे निजास्येन स्वमुखेन कृत्वा नलाननसंबन्धिनीं श्रियं कान्तिं लब्धुमनीश्वराणामशक्तानाम् । न विद्यते नलस्याननं येषां ते अनलाननाः इत्यर्थभेदेऽपि बर्हिर्मुखेषु वर्तमानोऽनलानन-शब्दो बर्हिर्मुखार्थत्वेन पुनरुक्तो भवत्येव । यथा विशेषणविशेष्यभावं विना वृक्षं तरुं [6]पश्येति । य एव वृक्षः स एव तरुः । तरुं तरणशीलं वृक्षं पश्येति तु न दोषः । अतरण-शीलानां व्यवच्छेदत्वेऽर्थभेदात् । अथवा चन्द्राभरणमिन्दुमण्डनं [7]पश्येतिवदत्र पौनरुक्त्यम् । तत्त्वतस्त्वर्थभेदो महान् विधत्ते एव ते नलमुखाः कथमपि भवितुं न शक्नुवन्तीत्यर्थः ॥ २२ ॥

नलस्य पश्यत्विययदन्तरं तैर्भैमीति भूपान् विधिराहृतास्यै ।
स्पर्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमूचे ॥ २३ ॥

1. & - ज्वचिता - 2. & - कल्पन्त 3. & - कल्पन्त { 4. & - बर्हिर्मुखानां
6. 7. B1. पश्यति { 5 & - बर्हिर्मुखं

तैर्भूपैः सह भैमी इयन्मदन्तरं विशेषं पश्यतु। एतेषां नलस्य च रूपकृत एतावत् प्रमाणो विशेषो वर्तत इति दमयन्ती प्रत्यक्षीकरोतु इति हेतोर्विधिर्भूपान- -तदर्थमाहूत चकर्ष। नहि देवाः शक्रादयः →[1] →किमुर्थमाहूता इत्याह। इन्द्रादीनपि रूपेण स्पर्धां संघर्षं कारयित्वा विधाप्य तेभ्यो दिग्गीशेभ्यः सकाशात् तस्यैव नलस्य प्रथिमानं महत्त्वमूचे भङ्ग्या जगाद विधिरिति संबन्धः। आत्मनोऽधिकेन साकं स्पर्धेति प्रसिद्धमेव। तैरिति करण एव वा तृतीया।

सभा नलश्रीयमकैर्यमाधैर्नलं विनाभूद्धृतदिव्यरत्नैः।

भामाङ्गणप्राघुणके चतुर्भिर्देवद्रुमैर्द्यौरिव पारिजाते ॥२४॥

सा सभा नलश्रीयमकैर्नैषधकान्तिसुसदृशैर्नलमूर्तिभिरेव यमप्रभृतिभिश्चतुर्भि- -र्धृतानि दिव्यानि रत्नानि यैस्तैस्तथाभूतैः कृत्वा नलं पञ्चमं सुसदृशं विना पारिजाते पञ्चमे सुसदृशे भामाङ्गणप्राघुणके सत्यभामाजिरमण्डने सति चतुर्भिर्देवद्रुमैः कृत्वा यथा द्यौरभूत् तथैवाभूत्। देवद्रुमैरपि धृतदिव्यरत्नैः पञ्च देवतरवः किल सुसदृशाः कामितफलप्रदाः सन्ति। कृष्णेनेन्द्रं विजित्य तदुद्यानात् पारिजातः सत्य- -भामाङ्गणे रोपितोऽभूदित्यागमः। सभाया दिवमुप-[119.a]-मानीकुर्वता कविनाऽ- -तीवचारुत्वमुक्तम्। नलस्य च पारिजातमुपमानता जयता देवद्रुमाणां साम्येऽपि पारिजातः खल्वन्य एव ॥२४॥

तत्रागमद्वासुकिरीशभूषा(वास)भस्मोपदेहस्फुरगौरदेहः।

फणीन्द्रवृन्दप्रणिगद्यमानप्रसीदजीवाद्यनुजीविवादः ॥२५॥

पूर्वं वासुकेः सामान्येन प्रयाणं कथितमिदानीं सभासन्निधिरभिधीयते। तत्र तावद् वासुकिरागमत्। कीदृशः?। ईशे भगवति शिवे यो वासः स्थितिस्तत एव यो भस्मोपदेहेन भूतिलेपेन स्फुरः प्रकटो गौरो देहो यस्यैति महत्त्वातिशयः सूचितः। वासुकिः प्रकृतगौरदेहोऽस्ति। भगवतो भूतिलेपेन तु तस्य गौरत्वमतीव- -व्यक्तीकृतम्। ईशस्य भस्मोपदेहः प्रसिद्ध एव। कीदृशः?। फणीन्द्राणां वृन्देन प्रणिगद्यमानाः समुच्चार्यमाणाः प्रसीदजीवेत्यादयोऽनुजीविनां वादः वचनानि यस्येति। फणीन्द्रवृन्दस्यानुजीवित्वकथनेन तस्य सर्पाणां राजराजत्वकथनम्। अनुजीविनश्च 'प्रसीदस्वामिन् जीवस्वामिन्' इत्यादिकान् वादान् स्वामिनः प्रतिपदं वदन्त्येव ॥२५॥

---

1. B, D. संहर्षं.

द्वीपान्तरेभ्यः पुरभेदनं तत् क्षणादवापे सुरभूमिभूपैः।
तत्कालमालम्बि न केन यूना[1] स्मरेषु पक्षानिल[2]तूललीला ॥२६॥

द्वीपान्तरेभ्यो द्वीपविशेषेभ्यः सकाशात् सुरभूमीनां भूपैस्तत्पुरभेदनं कुण्डिनाख्यं[3] पत्तनं क्षणादवाप्तं द्वीपानि[4] तु विशेषतः पुरस्ताद्[5] वर्णयिष्यन्ते। द्वीपानि हि देवभूमयस्तासां च भूपा अपि देवा[6], एवेति क्षणेनागमनम्। तत्र युक्त्या[7] हेत्वन्तरमाह। तस्मिन् काले केन वयस्येन स्मरेषूणां कामाशुगानां ये पक्षाः पत्त्राणि तेषामनिलो वायुस्तत्र वर्तमानस्य तूलस्य यवादिकस्य कस्य कर्पासलेशस्य[8] चालीला विभ्रमो नालम्बि। अपि तु कामवशात् त्वरिततरमेव। सर्वैर्युवभिस्तत्रागतमित्यर्थः। तेषां च दमयन्ती-स्वयंवरज्ञानं नारदादिभ्यः कर्णाकर्णिकया श्रुतत्वात् ॥२६॥

शस्ते वस्त्ये निवेशनेन सपर्यया कुण्डिननाकनाथः।
प्रियोक्तिवाग्[1]दानमुता धैरुपाचरच्चारु स राजचक्रम् ॥२७॥

कुण्डिनस्य नाकनाथ इन्द्रो भीमः। राजचक्रं नृपसमूहं चारु भव्यं यथा स्यात्तथमुपाचरत् समावर्जयत्। केन केनेत्याह। सपर्यया अर्घादिपूजया शस्तेषु श्लाघ्येषु वस्त्येषु आवासेषु निवेशनेन स्थापनेन प्रियोक्तीनां वाचः[10] समुच्चारणानि। आदरो यत्नः। नमुता विनयातिशयस्तत्प्रभृतिभिश्च ॥२७॥

चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे।
दानं दया सूनृतमातिथेयी चतुष्टयीरक्षणसौविदल्ला ॥२८॥

ननु भीमोऽपि [११९.b] राजा, तेऽपि राजानस्तत्किमिति तेषु तेनैवमाचरितमित्याह। नृपाणां चतुःसमुद्रीपरिखे वासितकीर्तिदारेऽन्तःपुरेऽवरोधेऽर्थाद् भूवलये चतुष्टयीरक्षणाय सौविदल्ला कञ्चुकिनी। का चतुष्टयीत्याह। दानं वितरणं दया करुणा सूनृतं प्रियसत्यं वचनमातिथेयी सपर्या गृहागतपूजा अनया चतुष्टया रक्षमाणा कीर्तिर्भूवलये स्थेयसी भवति, न चेद् व्यभिचरतीत्यर्थः। चत्वारः समुद्राः समाहृताश्चतुःसमुद्री, सैव परिखा जलखातिका यत्र। वासिता निवेशिता कीर्तिरेव दाराः कलत्रं यत्र। राज्ञां वासितदारेऽन्तःपुरे जलमयी परितः परिखा भवति, कञ्चुकिनी च रक्षिका मुख्यतो भवति ॥२८॥

1. B. -भिभ- 2. B, 8 --नल- 3. B. om. --नाख्यं पत्तनं {4. B.-द्वीपानि - 5. B. om. पुरस्ताद् 6. B. om. देवा- 7. B. om. युक्त्या ----ये. { - द्वीपानि
8. B. om. चालीला विभ्रमो- 9. B, 8 -दानादर- 10. 8. वाहा:

अभ्यागतैः कुण्डिनवासवस्य परोक्षवृत्तेष्वपि तेषु तेषु ।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि नावापि नृपैर्विशेषः ॥२९॥

अभ्यागतैरतिथिरूपैर्नृपैस्तेषु तेषु परोक्षव्यवहारेष्वपि नृपेषु विषये कुण्डिनेन्द्रस्य विशेषः पूजादिकृतो विभेदो नावापि । भीमेन सर्वेऽपि समतया सत्कृता इत्यर्थः । यो विशेषः किं वस्त्वित्याह । जिज्ञासितो ज्ञातुमिष्टो योऽसौ स्वेप्सितस्यात्माभिलषितस्य दमयन्तीलक्षणस्य लाभः प्राप्तिस्तस्य लिङ्गं चिह्नम् । यत्रैव भीमस्याधिक आदरस्तत्रैव दमयन्ती धरिष्यत इति परीक्षां कर्तुं राजभिः स न क्वापि दृष्ट इत्यर्थः । न च भीमस्त्वितो नलं जानाति यत्तं विशिष्य सत्कुर्यात् ॥२९॥

अङ्के विदर्भेन्द्रपुरस्य शङ्के न संममौ नैष तथा समाजः ।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥३०॥

शङ्के विदर्भेन्द्रो भीमस्तत्पुरं कुण्डिनं तस्याङ्के मध्यभागे एष समाजो नृपसमूहस्तथा, तेन प्रकारेण, न संममौ । अपि तु, सावकाशं वृत्तः । कथम्? यथा अगस्त्यस्य मुनेर्हस्ते पानावसरे पयोराशिर्यथा जगद्वा मुरारेर्जठरे । यथेत्युपमानसिद्धिवदत्रोपमेयस्यापि सिद्धिः । अगस्त्यस्याब्धिपानं विष्णोरुदरे विश्वस्थितिर्द्वयमागमे प्रसिद्धमेव ॥३०॥

पुरे पथिद्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयैव ।
नभोऽपि किर्मीरमकारि तेषां महीभुजामाभरणप्रभाभिः ॥३१॥

तस्मिन् कुण्डिने पन्थानश्च द्वाराणि च गृहाणि च पथिद्वारगृहाणि तावदुत्सवस्य विवाहमहस्य वाञ्छयैवाचित्राणि चित्राणि कृतानि चित्रीकृतानि आश्चर्यतां प्रापितानि एतद्युक्तमेव । एतत्त्वतीवाद्भुतम् । तेषां महीभुजामाभरणप्रभाभिः बहुवर्णभूषणरत्नकान्तिभिर्नभः खमपि किर्मीरं चित्रितमकारि कृतमिति काकुगर्भं [२००.व] वाक्यमाश्चर्यसूचकम् । गृहरचनादेव द्वारेषु लब्धेषु तेषां पृथगुपादानं तच्चित्रस्य पृथगवस्थितत्वात् । द्वाराणां खल्वन्यदेवालेख्यं गृहाणां चान्यत् ॥३१॥

विलासवैदग्ध्यविभूषणश्रीस्तेषां तथासीत्परिचारकेऽपि ।
आशासिषुः स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कंचित् ॥३२॥

तेषां राज्ञां परिचारके सेवकमात्रजनेऽपि विलासो विभ्रमो वैदग्ध्यं चातुरी विभूषणानि किरीटादीनि, तेषां श्रीः सम्पत्तादृश्यासीत् । यथा अमी विदर्भजा लोकास्तमपि परिचारकं नायकं परिचरणीयं स्वामिनमेव ज्ञातवन्तः ॥३२॥

न[1] स्वेदिनश्चामरमारुतेन सर्वत्र चित्रेष्व[2]निमेषनेत्राः[3] ।
म्लानस्रजो नातपवारणेन देवा नृदेवा बिभिदुर्न तत्र ॥३३॥

देवाः सुरा नृदेवा राजानश्च तत्र न विभिदुः, न विभेदं प्रापुः समा एवाभूवन्नित्यर्थः । तदेव साम्यमाह । देवास्तावन्न स्वेदिनः । अमरमारुतेन केनापि देवसंबन्धिना सततसंनिहितेन वातेनानुपलक्षितेन । न हि वातं विना स्वेदाभावः । चः समुच्चये । अन्येऽपि चामराणां प्रकीर्णकानां वातेन न स्वेदिनः । देवाः सर्वेषु चित्रेषु सर्वेष्वाश्चर्येषु निमेषरहितनेत्राः । आश्चर्यवशाच्चान्तःसन्तोषादिना निमेषो युज्यते परं तथापि येषां न भवतीत्यर्थः । नृदेवाश्च सर्वत्र सर्वेषु प्रदेशेषु यानि चित्राण्यालेख्यानि तेष्ववलोकनवशादनिमेषनेत्राः । देवाः आतपस्योष्णस्य वारणेन निषेधेन कृत्वा न म्लानस्रजः । न ह्यातपस्तेषां कदापि निकटवर्ती । तदभावे च कथं कुसुममाला म्लायन्तु । अन्ये तु आतपवारणेन छत्रेण कृत्वा न म्लानस्रजः । देवानां स्वाभाविके गुणत्रये प्रतिपाद्यमाने नरदेवानां त्वौपाधिके वाक्यसङ्गतिर्न दुर्लभा स्यात् ॥३३॥

अन्योन्यभाषाऽनवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नरेषु वाग्भिः सौवर्गवर्गो न जनैरचिह्नि ॥३४॥

ननु देवानामनिमेषत्वादिचिह्नगोपनमेवं सम्पन्नं भाषागोपनं कथं जातम् । सा हि देशभाषया त्वेवेत्याह । नानादिग्भ्यः समागतेषु नरेषु मध्ये स्वर्गीयाणां देवानां वर्गो जातिसमूहो वाग्भिर्न चिह्नितः । यतः किं कुर्वत्सु ? । अन्योन्यस्य भाषया योऽनवबोधस्तस्माद् या भीतिस्ततः संस्कृत्रिमाभिः संस्कृताभिर्वाग्भिर्व्यवहारवत्सु व्यवहारं कुर्वत्स्वित्यर्थः । करोति रत्न[4] स्वार्थेऽनन्तः । यथा राज्यमकारयत् । संस्करणेन शब्दागमजेन निर्वृत्ताः संस्कृत्रिमाः देवानां च ताः स्वाभाविक्य एव ॥३४॥

ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरे पुरि लेखि-[200.a]-तानि ।
निरीक्ष्य निन्युर्दिवसं निशां च तत्स्वप्नसम्भोगकलाविलासैः ॥३५॥

ते राजानस्तत्र पुरि पुरजनैश्चित्राणि बहुविधानि भैम्याश्चरितानि निरीक्ष्य दिनं निन्युः । तस्याः स्वप्ने याः सम्भोगकलाः सुरतकौशलानि[5] तेषां विलासललितानि, तैः कृत्वा निशां च निन्युरिति । तेषां तद्दर्शनरणरणकतरसूचनम् ॥३५॥

---

1. ख. निस्वेदिनं. 2. ख. चित्रैर्ननिमेष. 3. Bh. —नेत्रा. 4. Bh. रत्न.
5. ख. om. —कौशलानि.

सा विभ्रमं स्वप्नगतापि तस्यां निशि स्वलाभस्य ददे * यदेभ्यः ।
तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामम् ॥३६॥

सा भैमी स्वप्नगतापि सती तस्यां निशि यत्कारणादेभ्यो राजभ्यः स्वलाभस्य निजप्राप्तेर्विभ्रमं विलासं ददौ । अथ च विभ्रमं भ्रान्तिं तत्कारणादसौ सती साध्वी । अथ च वदान्या सती, स्थूलदात्री भवन्ती, अर्थिनां निजकामुकानां राज्ञां कामान् स्मरप्रधानान्मनोरथान् पूरयति स्म । अथ चार्थिनां याचकमात्राणां कामानभिलाषमात्रम् । स्वप्ने चैतद् घटमानं न विघटत एव ॥३६॥

वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः ।
स्वयंवरस्थानजनाश्रयस्तैर्दिनेऽपरत्रालमकारि वीरैः ॥३७॥

अपरत्र दिने द्वितीयेऽह्नि । तैर्वीरैः राजसङ्ग्रामसूरैः स्वयंवरस्थानस्य जनाश्रयो मण्डपमलङ्कृतम् । कीदृशैः? । वैदर्भस्य दूतानामनुनयोपचारैः परम्परया प्रापितैः-राकारितैः तथा शृङ्गाररसस्य वेषस्य च भङ्गीर्विविधान् प्रकारानुभावयद्भिः प्रकटयद्भिः । विदर्भाणां राट् विदर्भराट् तेन विदर्भराजेति वा पृथक् । तेन विनयेन कृत्वोपहूतैः ॥३७॥

भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याकृत प्राकृतबुद्धिमेव ।
प्रसूनबाणे विबुधाधिनाथः साऽशोभि तेनाथ सभा नलेन ॥३८॥

अथ तेन नलेन सा सभा शोभिता । तेन केनेत्याह । यं नलं वीक्ष्य विबुधाधिनाथ इन्द्रो भूषाभिरलङ्कारैः कृत्वा उच्चैरतिशयेन संस्कृते प्रसाधिते रूपातिशयं प्रापितेऽपि कामे प्राकृतबुद्धिं पृथग्जनधियमकृत । यं संसिद्धिसिद्धाद्-भुतरूपपात्रं नेत्रैः पीत्वा वृत्रहा इन्द्रस्त्रिजगालङ्कारमपि शम्बरजितं पामरवरमेवा-मन्यतेत्यर्थः । अथ च संस्कृते देववचने प्राकृतस्य भाषाभेदस्य बुद्धिमकृतेत्यर्थान्तरम् ॥३८॥

धृताङ्गरागे कलितद्युशोभां तस्मिन् सभां चुम्बति राजचन्द्रे ।
गताबताक्ष्णोर्विषयं विलङ्घ्य क्व क्षत्रनक्षत्रकुलस्य कान्तिः ॥३९॥

तस्मिन् धृताङ्गरागे राजचन्द्रे, कलितद्युशोभां सभां चुम्बति सति क्षत्रनक्षत्रकुलस्य कान्तिरीशोर्विषयं विलङ्घ्य क्व [२०१.a] गतेति विस्मयगर्भं काकुगर्भ-वचनम् । नले सभायामवतीर्णे ते सर्वे लब्धवर्णा अपि तुलितवर्णा राजानो विवर्णा जाता इत्यर्थः । राजा चन्द्र इव राजचन्द्रः । धृताङ्गरागः कुङ्कुमाद्यनुलेपो येन तस्मिन् । मुखचन्द्रस्योदयं कुर्वतोऽङ्गे मण्डले कालवशजात एव रागो लौहित्य-मस्त्येव ।

कलिता दिवः स्वर्गस्य शोभा यया ताम्। चन्द्रोऽपि नभस्युदेति, चुम्बनं चैकदेश-[1]-स्पर्शनम्। नायकनायिकाधर्मोऽप्यत्र। स्त्रा एव नक्षत्राणां कुलं तस्य। चन्द्रपक्षे नक्षत्राणामेव कुलं, दृशोर्विषयं दृष्टिगोचरम्। चन्द्रेऽनुदिते नभोविलिप्ते व्योम्नि नक्षत्राणां कान्तेरुदय उदिते त्वस्तः प्रसिद्ध एव। उपमानेन चोपमेयधर्मौ व्याख्यातः॥३९॥

प्रागृष्टस्य क्षोणिभुजामभुष्मिन्नाश्चर्यपर्युत्सुकिता निपेतुः।
अनन्तरं स्फुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा दृगंशाः॥४०॥

प्रथमं राज्ञां दृष्टय आश्चर्येण परिसमन्तादुत्सुकिता जातसम्भ्रमाः सत्योऽस्मिन् नले निपतिताः। आपातमात्रेण स्वल्पियःश्रियं स्वं विषयमाद्रृत एव परिचयादनन्तरं तु रागविरागाविति स्थितिः। पश्चादुन्नतानतभ्रुवां सतामीर्ष्यया कलुषा मलिनाः क्रूरा दृगंशा निपेतुरिति संबन्धः। ईदृश एवार्थं मत्सरिणां व्यवहारः। दृशोरंशा एकदेशा इति क्रूरदृष्टिसंस्थानकमेतत्॥४०॥

सुधांशुरेष प्रथमो भुवीति स्मरो द्वितीयः किमसावितीमम्।
दस्रस्तृतीयोऽयमिति क्षितीशाः स्तुतिच्छलान्मत्सरिणो बभर्त्सुः॥४१॥

मत्सरिणोऽसहना नृपाः स्तुतिमिषेण काक्वा इमं नलं भर्त्सन्ति स्म। कथमिति। इति कथमित्याह। एष भूमावाधोऽमृतकरः। अयं किं द्वितीयः स्मर इति च। तृतीयो दस्रोऽयमिति चापि। काकुविशेषाच्च स्तुतावपि निन्दा प्रतीयत एव॥४१॥

[2]ईदृशाः सन्ति कतीति दुष्टैर्दृष्टान्ततालीकनलावली तैः।
आत्मापकर्षे किल मत्सराणां द्विषः परस्पर्धनया समाधिः॥४२॥

तैर्नृपैर्मायानलानामिन्द्रादीनां चतुर्णामुदाहरणान्निदर्शनात् परस्परमूचे। किम-भिहितमित्याह। पश्यत अमुना समाः कियन्तः सन्ति, अपि तु बहवः सन्तीति काक्वार्थः। युक्तोऽयमर्थः। मत्सरणामन्यशुभद्वेषिणामात्मापकर्षे निजहानौ सत्यां द्विषः शत्रोः परस्पर्धनया अन्यसंघर्षेण कृत्वा समाधिः परमं सुखं भवति। समाधिः सिद्धान्तो वा। नावद्रूपेण नलाद् दूरतोऽपकृष्टा अत एवैभिरस्य भङ्ग्या तत्सुधारिभिर्देवैः सह स्पर्धा समुद्भाविता। अयमस्माकं पुरस्तात् कान्तिमत्तयातीव गर्वायते, जानीमो यथयमेतेषामीदृशा-[201. b]-नामेव पुरतो गर्वलवमपि कलयतीत्यादि॥४२॥

---

1. D. स्पर्शमात्रम्. 2. Bi. हे ईदृशाः.

गुणेन केनापि जनेषु वन्द्ये दोषान्तरोक्तिः खलु तत् खलत्वम्।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ॥७३॥

केनापि रूपादिनात्यन्तमसाधारणेन गुणेन कृत्वा जनेषु बहुषु मध्ये वन्द्ये मान्ये पुरुषे विषये या दोषान्तरस्यापरदोषस्योक्तिः तत् स्फुटं खलत्वं दौर्जन्यम्। यत् कारणात् रूपेण कृत्वा तस्यां संसदि सभायामदूषितस्तत्संसददूषितस्तस्य। तत्संसददूषितस्य तस्यां सभायां श्लाघार्हस्य नलस्य सुरैर्देवत्वविशिष्टैरिन्द्रादिभिर्नरत्वमदूषि मानुषत्वं दूषितमिति। पूर्वार्धार्थस्योत्तरार्धार्थो हेतुरेव। भवतु नाम वराकोऽयं दैवयोगात् रूपपात्रं तथापि मानुषोऽयं वयं च सुरा इत्यस्यास्माकं च महीयान् विशेषः। इति नैर्यत् तस्य नरत्वं दूषितं तेन तैस्तस्मिन्नात्मनः खलत्वमुल्बणीकृतमित्यर्थः। तत्र हि तदा रूपमेव प्राय उपयोगि, किं गुणान्तरविचारेण? ॥७३॥

मिथ्यानलांस्तथ्यनलो द्विपार्श्वीकृतोपवेशानवदत् सुवेषान्।
उभौ किमैलश्चनदर्पकश्च भवन्ति नासत्ययुतौ भवन्तः ॥७४॥ -पवे-

द्वयोः पार्श्वयोः समाहारो द्विपार्श्वी पार्श्वद्वयं सव्यापसव्यलक्षणं तत्र कृतोपवेशान् विहितासनान् सुवेषान् चारुनेपथ्यान् मिथ्यानलानिन्द्रादीन् तथ्यो नलो नैषधोऽवदत्। किमुवाचेत्याह। दर्पकः कामश्च ऐलः पुरूरवाश्च। उभौ नासत्याभ्यामश्विनीकुमाराभ्यां युतौ सहितौ भवन्तौ, न भवन्ति। अपि तु जाने यूयं चत्वारोऽपि त एव द्वौ द्वौ भूत्वा मम वामदक्षिणपार्श्वयोरुपविष्टा वर्तन्ते। भवदर्थस्य तु विधेयत्वे यूयं त एव न वर्तध्वे इति व्याख्या। विधेयानुधाताया स्वैरं क्रियमाणायामत्र कापि नार्थक्षतिः। भवत्स्वरूपास्त एव चत्वारस्तत्स्वरूपधरा भवन्तश्चत्वार इति। उत्तरश्लोकसङ्गतोऽर्थस्तु ग्राह्यः ॥७४॥

अमी तमीदृग्जगुरत्र मध्ये कस्यापि नोत्पत्तिरभूदिलायाम्।
अदर्पकाः स्मः सविधं स्थितास्ते नासत्यतां नात्र बिभर्ति कश्चित् ॥७५॥

अमी देवास्तं नलं छलेनेदृगुत्तरवाक्यं जगुः। कीदृगित्याह। अत्रैतेषु चतुर्षु मध्ये इलायामिलानाम्न्यां नार्यां कस्याप्युत्पत्तिर्नाभूत्। यत् त्वमिलाया अपत्यमैलः पुरूरवा इति पृच्छसीति नलस्याभिप्रायं छलेनान्यथैव परिकल्प्योत्तरयन्ति। अथ च इलाया भूमेरपत्यमैलस्तत्र भवो जातो वेति भवानन्वबुद्ध तन्न तथा। वयं दिवःसंबन्धिनो देवा इत्यर्थः। कि-[२०२ ब]-ञ्च भवता पृष्टं युष्मन्मध्ये कोऽपि दर्पकस्तदपि न।

ते समीपे वर्तमाना वयमदर्पकाः स्मः। न वर्तते दर्पको येषां तेऽदर्पकाः। एतेषु मध्ये दर्पकः कोऽपि न भवतीत्यर्थः। अथ च तव एतादृश रूपसर्वस्वाविषयभूतस्य पार्श्वे स्थिता वयमदर्पका दर्परहिताः स्मः। त्वदग्रे वयं न किञ्चिदेव, अन्यत्र तु वयमेव सर्वमेव किमपीत्यर्थः। किञ्चान्यत्। अत्रास्मासु मध्ये नासत्यतामश्विनीकुमारतां कश्चिन्न बिभर्ति। यद् भवान् पृच्छति अत्र नासत्यो दस्रोऽपि कोऽपि नास्तीति। अथ च। अत्रासत्यतां मिथ्यात्वं कश्चिन्न न बिभर्ति, अपि तु वयं सर्व एवासत्यतां बिभ्राणा वर्तामहे इति श्लेषार्थः ॥७५॥

तेभ्यः परान्नः परिकल्पयस्व श्रिया विदूरीकृतकामदेवान्।

अस्मिन् समाजे बहुषु भ्रमन्ती भैमी किलास्मासु धरिष्यतेऽसौ ॥७६॥

ते यदि न यूयं, तर्हि केऽन्ये द्वितीयरूपधननिधय इत्याह। तेभ्यश्चतुर्भ्यः सकाशात् परानुत्कृष्टान्नोऽस्मान् विमृश। कीदृशान्? श्रिया शोभया कृत्वा विशेषेण दूरीकृतो विजितः कामदेवो मन्मथो यैस्तान्। तर्हि भवतामीदृशानामुल्लासे को हेतुरित्याह। किलेति सम्भावने। अस्मिन् समाजे विविधवरमेलके भैमी बहुव्यक्तिषु भ्रमन्ती पर्यटन्ती सती रूपलोभेनास्मासु धरिष्यते मिलिष्यतीति निश्चयः। इति छलेनार्थः। तत्त्वतस्तु। हे श्रिया विदूरीकृतकामकान्त्या जितस्मर तेभ्यश्चतुर्भ्यः सकाशात् परा नितरान् सुरानस्मान् परिकल्पय। अस्मिन् समाजे बहुष्वस्मासु समानरूपेषु भ्रमन्ती मुह्यन्ती सती भैमी। किलास्मासु धरिष्यते, अपि तु न धरिष्यत एवेति काक्वा निषेधः। अथवा अस्मासु किल धरिष्यते, दैवयोगाद् घटेतापीति व्याख्याने किल शब्दः सम्भावनार्थ एव ॥७६॥

असाम यन्नाम तवेदृग् रूपं स्वेनाधिगत्य श्रितमुग्धभावाः।

तन्नो धिगाशापतितान्नरेन्द्र! धिक् चेदमस्मद् विबुधत्वमस्तु ॥७७॥

हे नरेन्द्र! नल तत्कारणान्नोऽस्मान् धिक् वयमतीव निन्दिताः। कीदृशान्? आशया तृष्णया भैमीलाभाशंसया पतितान् भ्रष्टान् दूषितानित्यर्थः। किञ्च। इदमीदृशमस्माकं विबुधत्वं पण्डितत्वं धिगस्तु निन्द्यमस्तु। ततः कुत इत्याह। यत्कारणान्नाम भोः स्वेन निजचक्षुषैव तव रूपं सौन्दर्यं अधिगत्य ज्ञात्वा श्रितमुग्धभावाः प्राप्तकिंकर्तव्यतामूढत्वा सन्तोऽपीह सभायामसाम वर्तामहे। तवेदृशं रूपं स्वयमनुभूय भैमीलाभदुराशया यद् वयमिहाद्यापि वर्तामहे। तस्माद् वयं

आनन्तोऽपि नितान्तमज्ञा निन्द्या एव । अथ चार्था-[२०२·७]-न्तरम् । हे नरेन्द्र !
तस्मात् कारणात् नोऽस्माकमाशापतित्वं दिक्पतित्वं धिक् निन्द्यामः । एतच्चास्माकं
विबुधत्वं देवत्वं धिगस्तु । एतदपि निन्द्यमेव । यत्कारणान्नाम स्तोकमसामयमसमयोचितं
देवव्यवहारानर्हन्नो रूपमाकारं स्वेनात्मनाधिगत्य प्राप्य श्रितमुग्धभावाः प्राप्तमनोज्ञत्वाः
स्मः । मुग्धभावो मूढत्वं पक्षे मनोज्ञत्वम् । असामेति अस्तेः पञ्चम्या आम[1] । यदिति
हेतुपदम् । पक्षे यदिति हेतुपदं गम्यम् । असामयमिति रूपस्य विशेषणम् । समयस्येदं
सामयं, न सामयमसामयम् । 'समयाः शपथा[2]चारकालसिद्धान्तसंविदः' [इति] ॥४७॥

सा वागवज्ञायितमां नलेन तेषामनाशङ्कितवाक्छलेन ।
स्त्रीरत्नलाभोचितयत्नमग्नमेनं हि न स्म प्रतिभाति किञ्चित् ॥४८॥

नलेनानाशङ्कितवाक्छलेन सता तेषां देवानां सा पूर्वोक्ता श्लिष्टा वाक्, अवज्ञायित-
-मामतिशयेनावज्ञाता कृता । हि यस्मात् किमपि नैनं प्रतिभाति स्म । तच्चित्तेऽर्थान्तरं
न स्फुरितमित्यर्थः । यतः कीदृशम् ? । स्त्रीरत्नलाभोचितो यो यत्नस्तत्र मग्नं तन्निष्ठम् ।
दमयन्तीप्राप्तिकृतकारणजातसंसक्तान्तःकरणमित्यर्थः ॥४८॥

यः स्पर्धया येन निजप्रतिष्ठां लिप्सुः स एवाह तदुन्नतत्वम् ।
कः स्पर्धितुः स्वाभिहितस्वहानेः स्थानेऽवहेलां बहलां न कुर्यात् ॥४९॥

अथवा युक्तमर्थं तेषां वाचमवगणितवानिति दर्शयति । यः पुरुषो देवदत्तादिर्येन
पुरुषेण यज्ञदत्तादिना सह स्पर्धया कृत्वा निजप्रतिष्ठामात्मगौरवं लब्धुमिच्छुः ।
स एव देवदत्तादिस्तस्य यज्ञदत्तादेरुन्नतत्वं महत्त्वमाह । न ह्यात्मनो हीनेन सार्धं
कश्चन स्पर्धते अपि त्वधिकेन । अत एव स्वेनाभिहिता स्वस्य हानिर्येन तस्य
स्पर्धितुः पुरुषस्य स्थाने युक्तामवहेलां न कुर्यात् । अपि तु तत्र तस्यावहेला युक्तैव ॥४९॥

गीर्देवतागीतयशःप्रशस्तिः श्रिया तडित्वल्ललिताभिनेता ।
मुदा तदाऽवैक्षत केशवस्तं स्वयं[3]वराडम्बरमम्बरस्थः ॥५०॥

तदा भगवान् विष्णुर्व्योमवर्ती सन्, प्रीत्या स्वयंवरस्याडम्बरं तूर्यरवमपश्यत् ।
कीदृशः ? । गीर्देवतया सरस्वत्या गीता यशसः प्रशस्तिर्वर्णनोत्कर्षो यस्येति सरस्वती-
-सान्निध्यं सूचितम् । श्रिया कृत्वा तडित्वतो विद्युल्लतालङ्कृतस्य जलदस्य
यल्ललितं विभ्रमस्तस्याभिनेता दर्शयितेति नवाम्बुदपटलमध्यविद्योतिनी विद्युदिव

1. ख· आम्· 2. ख· शपथो- 3. ख· स्वयंवराम्बरडम्बरस्थः

यस्य नीलोत्पलदलमेचके वक्षसि लक्ष्मीः सन्ततं विलसन्तीत्यर्थः । उपमानेनोपमेय-
-धर्म [२०३.८] आकृष्यत इति विष्णोर्मेचकत्वं श्रियाश्च गौरत्वमाख्यातम् ।
प्रसिद्धमेव तावद् द्वयमेतयोः ॥५०॥

अष्टौ तदाष्टासु हरित्सु दृष्टीः सदो दिदृक्षुर्निदिदेश देवः ।
लैङ्गीमदृष्ट्वापि शिरःश्रियं यो दृष्टौ मृषावादितकेतकीकः ॥५१॥

स देवस्तदा सदः सभामर्थात् स्वयंवरसमाजरूपां द्रष्टुमिच्छुः सन् स्वस्थानस्थ
एव चतुर्मुखत्वादष्टौ दृष्टीरष्टासु दिक्षु ददौ । को देव इत्याह । यो देवो लैङ्गीं
लिङ्गसंबन्धिनीं शिरसः श्रियम् । शोभामदृष्ट्वाऽपि दृष्टौ दर्शने मृषावादितकेतकीकः
मृषा मिथ्या वादिता केतकी येन स तथा ब्रह्मेत्यर्थः । एतच्चाख्यानं लिङ्गपुराणे ।
ब्रह्मा स्वयंवरं न परमायातो निजस्थानस्थस्तु ददर्शैव ॥५१॥

एकेन पर्यक्षिपदात्मनाद्रिं चक्षुर्मुरारेरभवत्परेण ।
तैर्द्वादशात्मा दशभिस्तु शेषैर्दिशो दशालोकत लोकपूर्णाः ॥५२॥

द्वादशात्मा सूर्य एकेनात्मना तेजोमयमण्डलरूपेण कृत्वाऽद्रिं मेरुं पर्य-
-क्षिपत्, प्रदक्षिणी चकार । परेण द्वितीयेनात्मना मुरारेश्चक्षुरभवत् विष्णोर्नेत्रीभूतः
शेषैरुद्धृतैर्दशसंख्याकैरात्मभिः कृत्वा लोकैः पूर्णा दिश आलोकत तेन च सुखेनैव
स्वयंवरालोकनसुखमनुभूतं द्वादशात्मेति यौगिकं नामात्र साभिप्रायम् ॥५२॥

प्रदक्षिणं दैवतहर्म्यमद्रिं सदैव कुर्वन्नपि शर्वरीशः ।
दृष्ट्वा महेन्द्रानुजदृष्टिमूर्त्या न प्राप तद्दर्शनविघ्नतापम् ॥५३॥

शर्वरीशश्चन्द्रो दैवतहर्म्यमद्रिं मेरुं सर्वकालं प्रदक्षिणं कुर्वन्नपि महेन्द्रानुजो
विष्णुस्तस्य दृष्टिः सैव मूर्तिस्तया दृष्ट्वा तस्य स्वयंवरस्य दर्शने यो विघ्न-
-स्तस्य तापं कष्टं न प्राप ॥५३॥

न यक्षलक्षैः किमलक्षि नो वा सिद्धैः किमध्यासि सभाप्तशोभा ।
स किंनरैः किं न रसाद्(शगाद्)सेवि नादर्शि हर्षेण महर्षिभिर्वा ॥५४॥

सा सभा प्राप्तशोभा लब्धश्रीका सती यक्षाणां लक्षैः किं नालक्षि, अपि तु
लक्षिता । सिद्धैर्वा किं नाध्यासि, अपि तु अधिष्ठिता । किन्नरैः किं शगाद् रसात्
नासेवि, अपि तु सेविता हर्षेण प्रीत्या महर्षिभिर्वा किं नादर्शि, अपि तु दृष्टैवेति
सर्वदेवयोनिसांनिध्यकथनम् ॥५४॥

वाल्मीकिरश्लाघत तामनेकशाखत्रयीभूरुहराजिभाजा ।
क्लेशं विना कण्ठपथेन यस्य देवी दिवः प्रागभुवमागमद्वाक् ॥५५॥

वाल्मीकिर्नाम मुनिस्तां सभामश्लाघत यस्य कण्ठपथेन गलनालमार्गेण वाग्देवी दिवः सकाशात् क्लेशं विना श्रमरहितैव प्रथममादौ भूमिमागता । यतः कीदृशेन अनेका सहस्र-[१०३-८]-सङ्ख्याः शाखा माध्यंदिनकौथु-मार्द्यो यस्याः सा, एवंभूता या त्रयी ऋग्यजुःसामलक्षणा, सैव भूरुहाणां वृक्षाणां राजिस्तां भजति यस्तेन एवंभूतेन कण्ठमार्गेण देव्या वाचो[1], दिवः सकाशात् भूमावागमनम क्लेशकारि । अन्यापि काचन स्त्री भूरुहराजिभाजा पथा दूरतोऽप्यागच्छन्ती न श्राम्यति । संस्कारवती कविवाक् प्रथमं किल वाल्मीकिनाम मुनौ प्रतिभाति स्म ॥५५॥

प्राशंसि संसद्गुरुणापि चार्वी चार्वाकतासर्वविदूषकेण ।
आस्थानपट्टं रसनां यदीयां प्राप्नामि वाचामधिदेवतायाः ॥५६॥

गुरुणा बृहस्पतिनाऽपि सा सभा प्राकरणिकी प्रशंसिता । कीदृशेन चार्वाक-ताया नास्तिकताया: सर्वसम्पूर्णो विदूषको नर्मसुहृत् । यथा नर्मसुहृत् प्रहसनार्थ-मश्लीलं जुगुप्सितमपि वक्ति तथा येन नरकादिहेतुत्वात् प्रहसनार्हं चार्वा-कता हेयत्वेन प्रदर्शितेत्यर्थः । अथ च चार्वाकतासंश्रितानां सर्वेषां विशेषेण दूषकः आस्तिकमार्गस्य स्थापकः । आस्तिकदर्शनस्य कर्ता किल बृहस्पतिः, यस्य संबन्धिनीं रसनां जिह्वां वाचामधिदेवताया आस्थानपट्टं प्राप्नामि । आस्थानमास्थानी तत्रत्यः पट्टश्चतुष्किका नानाविधवाङ्मयपरिवृता सती सरस्वती यामधिष्ठाय लोकानां शुभाशुभं पश्यतीत्यर्थः । एतेन गुरोर्वाचः सर्वविदितत्वं वेदितम् । यः प्रकृतरः स[2] सभा शुद्ध इत्युच्यते ॥५६॥

नाकेऽपि दीव्यत्तमदिव्यवाचि वचःस्रगाचार्यकवित्वकीर्त्यः ।
दैतेयनीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत् ॥५७॥

स काव्यः शुक्रः काव्येन कविकर्मणा कवित्वेन कृत्वा सभां भणति स्म । कीदृशः दैतेयनयस्य मार्गे सङ्घप्रवर्तकः दैत्यनयमार्गस्तावानेव वहति, यावन्तं स एव वाहयति दैत्यानां यो गुरुरित्यर्थः । यः काव्यो दीव्यत्तमदिव्यवाचि नाकेऽपि कविवर्णको विद्वान् । कीदृशः वचःस्रजां वाग्गुम्फानामाचार्यकमुपदेशकत्वं वेत्ति

1. B1. दिवो. 2. B1. स चाशुद्ध.

य: कवते कवयति चेत्यर्थः। आचार्यो हि स एव कथ्यते य आचारं प्रयुङ्क्ते, स्वयं चाचरति, तथा यः स्वयं मनोहरगुम्फं करोति। अन्यांश्च कारयतीति भावः। एतेन स मुख्यतो वर्णनयोगात् कविर्न तु रूढिवशात् इति प्रदर्शितम्। अतिशयेन दीव्यन्तीति दीव्यत्तमा तमेऽपूर्ववद् भावः। दीव्यत्तमा दिव्या वाग् येनेति विशेषाय स्वरूपमात्रकथनम् ॥५७॥

अमेलयद् भीमनृपः परं न नाकर्षदेतान् दमयन्त्यसैव ।
इदं विधातापि विचिन्त्य [२०८.७] यूनः स्वशिल्पसर्वस्वमदर्शयन्न ॥५८॥

तदेव काव्यस्य काव्यभजनमाह। एतान् यूनः परं केवलं भीमनामा नृप एव आमेलयत्। दमयन्त्येव केवलमेतानाकर्षति स्म। विधातापि एतान् यूनः स्वशिल्पस्य निजविज्ञानस्य सर्वस्वं जीवभूतं वस्त्विदं नादर्शयत्। अपि त्वेतान् यूनः स्वविज्ञानस्य यत्प्रधानभूतं वस्तु तदेवेदं विचिन्त्यादर्शयत्। इदं किं य एते युवान इति ॥५८॥

एकाकिभावेन पुरा पुरारिर्यः पञ्चतां पञ्चशरं निनाय ।
तद्भीसमाधानममुष्य कायनिकायलीला किममी युवानः ॥५९॥

पूर्वं यः पुरारिरेकाकितया शम्बरारिं मारितवान्, तस्मात् यद्भीस्तस्याः समाधानं सिद्धान्तः प्रतीकारोपायः किममी युवानोऽमुष्य स्मरस्य कायनिकायलीला देहसमूह-विभ्रमः अपि तु स्मरस्यैव देहसमूहक्रीडयैव युवान एव भवतीति प्रतीकारः ॥५९॥

पूर्णेन्दुबिम्बाननुमासभिन्नान्स्थापयत्यत्रापि विधाय[1] वेधाः ।
तैरेव शिल्पैर्निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥६०॥

मन्ये वेधा अनुमासभिन्नान् मासे मासेऽन्यानन्यान् पूर्णेन्दुबिम्बान् विधाय सृष्ट्वा वचाप्यविज्ञाते स्थाने स्थापयति स्म। तैरेव पूर्णेन्दुबिम्बैः कृत्वा लावण्यैक-रूपाण्यमीषां मुखानि निर्ममे। मन्ये इति सामान्योपक्रमे ॥६०॥

[2]सुधार्पितं मूर्धसु रत्नमेभिर्यन्नाम तानि स्वयमेत एव ।
स्वतः प्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ॥६१॥

एभिर्नृपैः शिरःसु ~~रत्नेभि~~ रत्नं शिखा मणिर्नाम वृथा धृतम्। यत्कारणान्नाम प्रकट्यैव त एव युवानो नृपाः स्वयमात्मनैतानि रत्नानि पुरुषेषु हि ते रत्नभूताः सन्त्येव किमित्येषामेतद् धारणं, वृथेत्याह। स्वतः आत्मनः सकाशात् प्रकाशे सति, आत्मबोधे स्फुरणार्थमधिकोल्लासाय परमन्यबोधान्तरप्रकाशान्तरं नार्थ्यं चन्द्रसूर्यादीनां स्वत एव

1. ब. निधाय. 2. ब. B1. सुधा—

प्रकाशोऽस्ति ते किं निजस्य प्रकाशान्तरं कांक्षन्ति, अपि तु नैव ॥६१॥

प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत् ।

न शक्ष्यतो लक्षयितुं विमिश्रौ दस्रौ सहस्रैरपि वत्सराणाम् ॥६२॥

यदि दस्रावश्विनीकुमारावुच्चैर्मुदा समधिकप्रीतिवशादिदं प्रत्यक्षं सुन्दराणां वृन्दं प्रवेक्ष्यतः प्रविशेताम् । तत् ततः परस्परमन्योऽन्यं विमिश्रमेथिः सुन्दरैः सह मिलितं सद् वत्सराणाम् (णां) सहस्रैरपि लक्षयितुं चिन्हयितुं न शक्ष्यतो, न शक्नुयाताम् ॥६२॥

स्थितैरियद्भिर्युवभिर्विदग्धैर्दग्धेऽपि कामे जगतः क्षितिः का ।

एकाम्बुबिन्दुव्ययमम्बुराशेः पूर्णस्य कः शंसति शोषदोषम् ॥६३॥

इय-[२०५.७]-द्भिरुत्प्रमाणैर्युवभिर्विदग्धैर्दोहवर्जितैः स्थितैर्ध्रियमाणैरुपलक्षितस्य जगत एके कामे दग्धेऽपि का क्षतिरपि तु न स्तोकापि हानिः । यतः पूर्णस्य समुद्रस्य एकजलबिन्दोरभावं कः शोषदोषं शंसति, अपि तु न कोऽपि शोषलक्षणो दोषः शोषदोषस्तम् । एकस्याम्बुबिन्दोर्व्ययः विदग्धैरित्यस्य च्छलेनायमर्थः ।

तत्त्वतस्तु विदग्धैश्चतुरैः ॥६३॥

इति स्तुवन् हुंकृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतैव ।

ओंकारभूम्ना पठि(ठ)तैव वेदान् महर्षिवृन्देन तथाऽन्वमानि ॥६४॥

स काव्य इति स्तुवन् सन् गानं कुर्वतैव गन्धर्वाणां तुम्बुरुप्रभृतीनां वर्गेण हुंकृतेर्हुंकारोच्चारणस्य वर्गणाभिर्मेलनैरन्वमान्यनुज्ञातः प्रणवाधिक्येन श्रुतीः समुच्चारयता महर्षीणां वर्गेणान्वमानीति सम्बन्धः 'साधु साधु स्तूयते' इति सूचितविषयीकृत इत्यर्थः । गन्धर्वाणां गमकगतिवशजातो हुंकारस्तस्यानुमतिदाने करणत्वं जगाम, महर्षीणां च वेदमन्त्रानुरोधप्रवृत्त ओंकारस्ताश्भावं समाश्रयत् । अयं चार्थोऽनुभवसिद्धः ॥६४॥

न्यवीविशत्तानथ राजसिंहान् सिंहासनौघेषु विदर्भराजः ।

शृङ्गेषु यत्र त्रिदशैरिवैभिरशोभि कार्तस्वरभूधरस्य ॥६५॥

अथ भीमस्तान्नृपोत्तमान् भद्रासनेषु निवेशयति स्म । यत्र येषु निविष्टैरेभिर्नृपोत्तमैः कार्तस्वरभूधरस्य कनकगिरेः शृङ्गेषु निविष्टैस्त्रिदशैर्देवैरिवाशोभि शोभितम् । उपमानानां सुवर्णरत्नमयानां शृंगाणां (शृङ्गाणां) बलादुपमेयानां सिंहासनानामपि सुवर्णरत्नमयत्वमायातं शृङ्गाणां तु सुवर्णरत्नमयत्वं कार्तस्वरभूधरसबन्धात् ॥६५॥

विचिन्त्य नानाभुवनागतांस्तानमर्त्यसंकीर्त्यचरित्रगोत्रान् ।
कथ्याः कथंकारममी सुतायामिति व्यषादि क्षितिपेन तेन ॥६६॥

तान्नृपान्नाना अनेकेभ्यो भुवनेभ्यो आगतान् तत एव न मर्त्येन मनुष्येण कीर्त्यानि कीर्तयितुं शक्यानि चरित्राणि वृत्तानि गोत्राणि चान्वया येषां तांस्तथाविधान् विचिन्त्य दमयन्त्याः विषये कथंकारं कथं कृत्वा कथ्याः कथनीया इति तेन क्षितिपेन व्यषादि विषादः प्राप्तः। कथंकारमिति अन्यथैवं कथमित्थं सु सिद्धाप्रयोगश्चेदिति णम् ॥६६॥

अह्नाय संकल्पितकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः ।
तदाकुलोऽसौ कुलदैवतस्य स्मृतिं ततान क्षणमेकतानः ॥६७॥

अथासौ भीमस्तदा आकुलो व्यासक्तः सन्, एकतानोऽन-[205.a]न्यवृत्तिर्भूत्वा कुलदैवतस्य रथाङ्गपाणेर्विष्णोः स्मृतिमाततान, स्मरणमकरोत्। किं वस्तुभूतस्येत्याह। अह्नाय पुरुषः चिन्तितवासनाविषये कल्पशाखिन एव। भीमस्य विष्णुः कुलदेवोऽस्ति ॥६७॥

तच्चिन्तनानन्तरमेव देवः सरस्वतीं सस्मितमाह स स्म ।
स्वयंवरे राजकगोत्रवृत्तवक्त्रीमिह त्वां करवाणि वाणि! ॥६८॥

तस्य भीमस्य स्मरणादनन्तरमेव देवो भगवान् विष्णुः सस्मितं यथा स्यात्तथा सरस्वतीमाह स्म। किमब्रवीदित्याह- भो वाणि! सरस्वति! अस्मिन् स्वयंवरे राजकस्य नृपसमूहस्य गोत्राणि वृत्तानि च वक्त्रीं भाषणशीलां करवाणि। प्राप्तकाले पञ्चमी ॥६८॥

कुलं च शीलं च बलं च यूनां जानासि नानाभुवनागतानाम् ।
एषामतस्त्वं भव वावदूका मूकायितुं कः समयस्तवायम् ॥६९॥

नानाभुवनागतानामेषां यूनां त्वमेतत् त्रयं वेत्सि। अतस्त्वं वावदूका वक्त्री भव। अयं तव मूकायितुं मूकीभवितुं कः समयः, अपि तु न भवत्येव। 'वाचोयुक्तिपटुर्वाग्मी वावदूकश्च वक्तरि' [इति] अवाचि मूकः ॥६९॥

जगत्त्रयीपण्डितमण्डितैव सभा न भूता न च भाविनी च ।
राज्ञां गुणज्ञापनकैतवेन संख्यावतः श्रावय वाङ्मुखानि ॥७०॥

एवं सभा जगत्त्रय्याः पण्डितैर्मण्डिता न च भूता, न च भाविनी, अपि तु वर्तमानैवास्ति, तस्मात् नृपाणां गुणप्रकाशनव्याजेन संख्यावतः पण्डितान् वाङ्मुखानि उपन्यासान् श्रावय ॥७०॥

इतीरिता तच्चरणात्परागं गीर्वाणचूडामणिमृष्टशेषम् ।
तस्य प्रसादेन सहाज्ञयाऽसावादाय मूर्ध्नादरिणी बभार ॥७१॥

असौ भगवती भारती आदरिणी यत्नवती सती, तस्य भगवतो विष्णोश्चरणात् सकाशात् परागं रजःकणविशेषं परागं पुष्पवसरसंसक्तं कौसुममेव रेणुं वा आदाय स्वयं गृहीत्वा मूर्ध्ना बभार। कथम् ? सह। केन ? तस्य भगवत आज्ञयैव प्रसादेन सह। भगवत आज्ञा हि महान् प्रसादः। कीदृशं परागमिति तं विशिनष्टि गीर्वाणानां चूडासु वर्तमानैर्मणिभिर्विमृष्टमुत्पुंसितं ततः शेषमुद्धृतमिति भगवतो महत्त्वातिशयसूचनम् ॥७१॥

मध्येसभं सावततार बाला गन्धर्वविद्याधरकण्ठनाला ।
त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्तितदृक्तरङ्गा ॥७२॥

ज्ञानात्मा लघुदीर्घमध्यतनुभिर्यान्तःस्थिता देहिनां, भाषाभेदशतैर्बहिः परिणता यार्थेषु नानात्मसु, सा वाचामधिदेवता भगवती श्लोकात्मिका काव्यसार्थेतद्ग्रंथसूक्तमौक्तिकलता-मध्यस्थिता नायिका। सा भगवती भारती [1]बाला कुमारीरूपा पावनातीव मान्या मध्येस-[205.b]-भं प्राकरणिक्याः सभाया मध्येऽवततार, अवतीर्णेत्यनेन पूर्वाव-स्थाया महत्त्वं सूचितम्। महतामेव हि [2]भूमिजन्मन्यवतारव्यवहारः। कीदृशी सेति तस्या विशेषणत्रयोपन्यासोऽसौ [3]गन्धर्वविद्याधरकण्ठनालेत्यादि। गन्धर्वविद्या गीतशास्त्र-मेवाधरं बुध्नं यस्य तद् गन्धर्वविद्याधरं एवंभूतं कण्ठनालं यस्याः सा तथा। कण्ठ-नालमूलभागत्वेन गान्धर्ववेदपरिणतोऽस्तीत्यर्थः। तत्त्वतस्तु गन्धर्वविद्याया धरं धारक-माधारत्वेन। गानकलाविलासा यस्याः कण्ठस्थास्तः सन्तः सं विलसन्तीत्यर्थः। तथा त्रयी ऋग्यजुःसामलक्षणा तद्भूता तद्रूपतां प्राप्ता वलीनामौदरीणां मांससंकोचलेखानां विशिष्टा भङ्गा रचनाविशेषा यस्याः सा तथा। वेदत्रयी यस्यास्त्रिवलीरूपेण परिणतास्तीत्यर्थः। त्रय्या निर्वृत्तास्त्रयीमयाः अत्रयीमयास्त्रयीमया भूतास्त्रयीमयीभूतास्ते च ते वलीविभङ्गाः यस्याः तथा। तत्त्वतस्तु त्रयी त्रिसङ्ख्या प्रस्तुता यत्र ते त्रयीमयास्त्रिसंख्यां प्राप्ताः। [4]पश्चाद्व्यर्थः। पूर्ववत् यस्यास्त्रिवली न्यूनाधिकभाववर्जितत्रिसङ्ख्याविशिष्टाऽस्तीत्यर्थः। अन्यच्च साहित्येन काव्यनाटकचम्पूकथाऽऽदिरूपेण निर्वर्तितौ निष्पादितौ दृशावेव तरङ्गौ यस्याः सा तथा। [5]चाञ्चल्यातिशयाद् दृशोस्तरङ्गत्वम्। तत्त्वतस्तु सा हि तेन संहतत्वेन मिलितत्वेन निःशेषेण वर्तितौ दृक्तरङ्गौ यस्याः सा तथा। ~~यस्या दृक् तरङ्गौ~~

अत्र पक्षे 'वर्ति' धातुश्चौरादिक इजन्तः। यस्या दृक् तरङ्गौ परस्परं सुमिलितावनु-गुणौ स्त इत्यर्थः। गुणकृतमेव सहितत्वं, न तु संस्थानकृतं तद्धि महान् दोषः। एवं प्रति-श्लोकं भगवत्या वाङ्मयमूर्तेर्भौतिकमूर्तेश्च सृष्टिविशेषो ज्ञेयः ॥७२॥

1. B1.-लो ---रूपा ---ीव [2]. B1. om. भूमि --- व्यव-. 3. B1. पूर्व-. 4. B1. पश्चा -त्यर्थः।
5. B1. om. चाञ्चल्या ----सा तथा।

आसीदथर्वा त्रिवलित्रिवेदीमूलाद्विनिर्गत्य वितायमाना ।
नानाभिचारोचितमेचकश्रीः श्रुतिर्यदीयोदररोमलेखा ॥७३॥

यस्या इयं यदीया उदररोम्णां लेखा, उदरस्य रोमलेखा वा, अथर्वनाम्नी श्रुतिरासीत्। उदरी रोमलेखा रोमावली यस्या अथर्वाख्यया श्रुत्या निष्पन्नेत्यर्थः। अथर्वा श्रुतिरनुधा उदरमध्यरलेखा विधेया। कथं ज्ञायतेऽथर्वा श्रुतिरेवास्या रोमावली संवृत्तेत्यत्र हेतुगर्भं विशेषणद्वयमाह। कीदृशी सा त्रिवलिरूपा या त्रिवेदी वेदत्रयी तदेव मूलं प्रथमं जन्मकारणं, तस्माद् विशेषेण निर्गत्य निसृत्य वितायमाना प्रसरन्ती। वितायमानेति कर्म-[२०६.a]-कर्तरि। अथर्वो वेदः किल वेदत्रयीत एव निर्गतः। तथा नाना अनेके अभिचारा हिंसाकर्माणि तदुचिता मेचकश्रीः कार्ष्ण्यसम्पद्यस्याः। अथर्ववेदे हिंसाकर्मोचितानां मेचकद्रव्याणामायसस्समित्कस्तूरिकानुलेपना(-दी-)दीनामेव बाहुल्यं मेचकश्रीर्मेचकत्वविशिष्टानां द्रव्याणां श्रीरिति भावानयने द्रव्यानयनम्। तत्त्वतस्तु त्रिवलिः प्रसिद्धा तस्यास्त्रिवेदी वेदीरूपं स्थानत्रयं तस्मात् हि निर्गत्य वितायमाना. किञ्च न खल्वनाभिचारोचितमेचकश्रीः, अपि तु नाभिचारोचितमेचकश्रीः। नाभौ चारः संचरणं नाभिचारः। तत्रोत्थिता मेचका चासौ श्रीः। कान्तिश्च नाभिचारोचितमेचकश्रीः। न ह्यभिचारोचितमेचकश्रीः, अनाभिचारोचितमेचकश्रीः। पश्चात् नस्यानेत्यनेन संबन्धिविधिरेव लभ्यते। नाभिचारोचितमेचकश्रीरित्यर्थः। यस्या ईदृशीयमुदररोमलेखा साक्षादथर्वा श्रुतिरेव रूपातिशयेन मोहजनकतया वशीकरणमूलत्वात् ॥७३॥

शिक्षैव साक्षाच्चरितं यदीयं कल्पक्रिया कल्पविधिर्यदीयः ।
यस्याः समस्तार्थविभक्तिरूपैर्निरुक्तविद्या खलु पर्यणंसीत् ॥७४॥

यदीयं चरितं वृत्तं गमनं वा साक्षान्मूर्तिमत्ती शिक्षैव शिक्षानाम वेदाङ्गमेव। किञ्च यदीय आकल्पविधिर्वेषरचनाकल्पस्य कल्पाख्यस्य वेदाङ्गस्य क्रिया सम्पदैव सम्पन्न इत्यर्थः। अपरं च खलु नूनं यस्याः समस्तेष्वर्थेषु घटपटादिपदार्थसार्थेषु निश्चितानि उक्तीनां वाक्यानां यानि रूपाणि वर्णपदसमुदायविशेषा निरुक्तीनामाकृतयो वा रूपाणि तैः कृत्वा निरुक्तनामवेदाङ्गविद्या पर्यणंसीत्परिणता तद्रूपतां प्राप्तेत्यर्थः। अत्र पक्षे शिक्षादीनां वेदाङ्गानां चरितादिनिर्माणे समवायिकारणत्वम्। तत्त्वतस्तु अतिसादृश्यात् रूपकयुक्त्या समुत्कर्षः। अथवा यदीयं चरितं वृत्तं साक्षाच्छिक्षैव शिक्षणमेव उपदेश एवेत्यर्थः। किञ्च यदीय आकल्पविधिर्नेपथ्यनिर्मितः कल्पक्रिया विशिष्टः कल्पनं कल्पो नानाविधरचनाविशेषस्तस्य श्रीश्चारुता तथा।

यस्या वेषो बहुभिर्भङ्गिभिः कल्पितो रचितोऽस्तीत्यर्थः। तथा खलु नूनं निरुक्तविद्या यस्याः समस्तार्थनिरुक्तिरूपैः परिणतास्ति इयमेव सा निरुक्तविद्या या वेदाङ्गेषु षष्ठमङ्गं प्रसिद्धेत्यर्थः ॥७४॥

जात्या च वृत्तेन च भिद्यमानं छन्दो भुजद्वन्द्वमभूद्यदीयम्।
श्लोकार्धविश्रान्तिमयीभविष्णुपर्वद्वयीसन्धिसुमध्यचिह्नम् ॥७५॥

छन्दः कर्तृ यदीयं भुजयोर्द्वन्द्वमभूत्। कीदृशम्? जात्या जातिभेदेन च भिद्यमानं [२०८.८] द्विधावृत्ति तच्च तद्भेदद्वयं तत्र प्रसिद्धमेव। कीदृशं भुजद्वन्द्वं, अत्र श्लोकार्धविश्रान्तिमयौ सन्तौ श्लोकार्धविश्रान्तिमयीभविष्णू। पर्वद्वय्या ग्रन्थिद्वयस्य सन्धौ संधाने एव सुष्ठु मध्ये वर्तमानं चिह्नमुपलक्षणं यत्र तत् तथा। श्लोकार्धे पाठधारायां या विश्रान्तिः सैवेयं पर्वद्वयी सन्धानरूपेण परिणतास्तीत्यर्थः। तत्त्वतस्तु रूपकयुक्त्या उपमानोपमेयभावोद्भावनया भुजयोर्भौतिकत्वमायातमेव ॥७५॥

-श-
असंसुयं सा गुणदीर्घभावकृतां दधाना विततिं यदीया।
विधायिका शब्दपरम्पराणां किं चारचि व्याकरणेन काञ्ची ॥७६॥

किञ्चाधिकमेतत् निःसन्देहं यदीया काञ्ची मेखला व्याकरणेन शब्दागमेन कृत्वा अरचि, आरब्धा। कीदृशी? गुणश्च दीर्घश्च भावश्च गुणदीर्घभावास्तत् तत् सूत्रेषु प्रतिपादिता विशेषास्तत्कृतां विततिं दधाना तथा शब्दानां नानाविधाक्षररूपाणां विधायिका व्युत्पादयित्री असंशयं सन्देहं विनैव विधायिकेति संबन्धः। तत्त्वतस्तु विशिष्टमाकरा-माकृतिविशिष्टं संस्थानं, तेन कृत्वा यस्या मेखला रचिता। कीदृशी?। गुणस्य सूत्रस्य दीर्घभावो दीर्घत्वं तत्कृतां विशिष्टां ततिं तानं दधाना शब्दपरम्पराणामु[1]त्पादिकैवंभूता सा प्रसिद्धा रणत्काराणां क्षुद्रघण्टिका च सौवर्णक्षुद्रघण्टिकानां सद्भावात् ॥७६॥

स्थितैव कण्ठे परिणम्य हारलता बभूवोदिततारवृत्ता।
ज्योतिर्मयी तद्भजनाय विद्यामध्येऽङ्गमङ्केन भृता विशङ्के ॥७७॥

[2] विशङ्के सम्भावयामि। ज्योतिर्मयी विद्या ज्योतिर्नाम वेदाङ्गं हारलता बभूव। किम्भूता बभूव परिणम्य परिणामं प्राप्य अर्थात् हारलतात्वेन क्व स्थिता [3][तस्याः] कण्ठ एव। इयं कण्ठे सर्वकालस्थायिनी हारलता ज्योतिर्विद्याया एव परिणाम इत्यर्थः। कीदृशी विद्येत इत्याह। उदितानां ताराणामश्विन्यादीनामुडूनां वृत्तं व्यवहारो यस्यां सा तथा। उदितानामस्तमितानां च तारागणानां वृत्तं वर्तनं गणनव्यवहारस्तत्र वर्तते किमर्थं

1. ४. शब्दपरम्पराणामुत्तरोत्तर रणत्काराणां विधायिका च। 2. B1. om. विशङ्के.
3. B1. ४. om. तस्याः

सा हारलतीभूय कण्ठे स्थिता इत्याह। यद्भजनाय यस्या भगवत्या भजनं भागस्तस्मै भगवत्याः कस्यापि वस्तुनो वण्टनाय, भागहारज्ञानं विना सम्यक् वण्टनं न घटते। पुनः कीदृशी सा? भृता पूर्णा केन अङ्केन गणनासूचकाक्षरविशेषेण क्व मध्येऽङ्गं अङ्गानां वर्णानां मध्ये अन्येषु पञ्चस्वङ्गेषु ज्यक्षराणामेव प्राधान्यं, ज्योतिःशास्त्रे त्वङ्कानाम्। अङ्केनेति जातावेकवचनं, अङ्कैर्भृतेत्यर्थः। तत्त्वतस्तु विशङ्के ज्योतिर्मयी ज्योतींषि नक्षत्राणि प्रस्तुतानि यत्र [२०७.a] सा ज्योतिर्मयी तारामयी विद्या-विज्ञानकर्त्रेव यस्या भगवत्या भजनाय सेवनाय हारलतारूपा कण्ठे परिणम्यैव स्थिता वर्तते। अन्तरा कण्ठस्थ शास्त्ररूपेण लगित्वैव स्थितास्तीत्यर्थः। हारलता-मौक्तिकानां ज्योतीरूपत्वादेवमूहः शब्दच्छलमात्रेण ज्योतिर्मयी विद्या स्वरवर्णरूपेण या कण्ठाभ्यन्तरे वर्तते, सैव बहिर्मुक्ता लतात्वेन परिणम्य स्थितास्तीत्यर्थः। कीदृशी हारलता? उदिता कान्त्याधिक्यादुदयपरा शुद्धा वृत्ता निस्तला। पुनः कीदृशी? भृता धृता। केन? अङ्केन क्रोडेन। क्व? मध्येऽङ्गं अङ्गस्य देहस्य मध्ये। प्रथमपक्षे ज्योतिर्विद्याया हारलतात्वेन परिणामस्तात्त्विकः द्वितीयपक्षे त्वतिसादृश्याद् आरोप-विषयः ज्योतिर्भिर्द्योतदृष्टिषु मुक्ता शुद्धो च तारः स्यात् ॥७७॥

अवैमि वादिप्रतिवादिगाढस्वपक्षरागेण विराजमाने।

तौ पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ॥७८॥

अवैमि तौ तादृशौ प्रवालद्युत्याधिकौ यदीयौ रदच्छदावोष्ठौ पूर्वपक्षोत्तरपक्षशास्त्रे द्वे भूतवती भूते तदोष्ठत्वेन परिणते तद्दारब्धावेवास्या ओष्ठावित्यर्थः। साध्यधर्मविशिष्टो धर्मी पक्षः। पूर्वः प्रथमः प्रश्नरूपः पक्षः पूर्वपक्षः। उत्तरोऽनन्तरः सिद्धान्तरूपः पक्षः उत्तरपक्षः। यथासङ्ख्यं तत्प्रधाने शास्त्रे पूर्वपक्षोत्तरपक्षशास्त्रे कीदृशी द्वे अपि तदाह। वादी प्राश्निकः प्रतिवादी त्वौत्तरिकः (-रकः)। तयोः स्वे पक्षे पूर्वोक्तलक्षणे योऽ-सौ रागस्तेन कृत्वा विशेषेण शोभमाने। रागो लौहित्यं शब्दच्छलमात्रेण। तत्त्वतस्तु राग आसक्तिर्वज्रलेपवत् स्वपक्षे लगनम्। अत्रापि प्रथमपक्षे तद्रूपतापत्तिस्तात्त्विकी। तत्त्वतस्तु काल्पनिकी। वचनं लिङ्गं च क्वापि क्वापि विधेयापेक्षं, क्वापि क्वापि त्वनूद्यापेक्षं अत्र रदच्छदौ विधेयौ पूर्वपक्षोत्तरपक्षशास्त्रे त्वनूद्ये अत्र भूतवती इत्यनूद्यलिङ्गता ॥७८॥

ब्रह्मार्थकामार्थवेदभेदाद् द्विधा विधाय स्थितयात्मदेहम्।

चक्रे पराच्छादनचारु यस्या मीमांसया मांसलमूरुयुग्मम् ॥७९॥

यस्या ऊर्वोर्द्वयं मीमांसया वेदविचारशास्त्रेण कृतमारब्धं मांसलमिति मासं लाति आदत्त इति मांसलम्। मीमांसा हि वेदाश्रया। वेदेषु यज्ञेषु प्रायेण मांसस्य स्वीकारः। तत्त्वतस्तु मांसलं घनम्। पुनः कीदृक्? परेषां प्रतियादिनामाच्छादने तिरस्करणे चारु यथा हि कारणं तथैव कार्यं मीमांसा हि पराच्छादनचार्वी एतदपि तथैव। तत्त्वतस्तु परमुत्कृष्टमाच्छादनं वस्त्रं यत्र तत्तथा। मांसलत्वमपि छलपक्षे कारणादेवावगन्तव्यम्। ननु मीमांसा तावदेका द्वयं चैतदित्याह। ब्रह्मार्थ-कामार्थकवे-[२०१. ७]-दभेदाद् आत्मदेहं द्विधा विधाय स्थितयेति। वेदो हि द्विविधः ब्रह्मार्थः कामार्थश्च। यत्र ब्रह्मपरं तत्त्वं प्रतिपाद्यते, स ब्रह्मार्थः। यत्र कर्मफलादि प्रतिपाद्यते स कामार्थः। एवं वेदस्य द्विधा देहतया मीमांसया अपि द्विधा देहत्वम्। अत्रापि पारमार्थिकं काल्पनिकं च पूर्ववन्मूर्तिद्वयं वेदितव्यम् ॥७९॥

उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोडशभिः पदार्थैः।
आन्वीक्षिकीं यद्दशनद्विपालीं तां मुक्तिकामाकलितां प्रतीमः॥८०॥

द्विरूपा पाली पङ्क्तिर्द्विपाली यस्या दशनद्विपाली यद्दशनद्विपालीं तां आन्वीक्षिकीं तर्कविद्यां विद्मः। यस्या दशनद्विपाली तर्कविद्या कृतेति प्रतीतिरस्माकमित्यर्थः। यतः कीदृशीं मुक्तिकामैर्मुमुक्षुभिराकलितां परिच्छिन्नां निश्चितांतरामित्यर्थः। तत्त्वतस्तु मुक्तैव मुक्तिका स्थूलमौक्तिकाख्यातां मुक्तिकामाकलितां बद्धां प्रतीमः। मुक्तिकामिति जात्येकवचनम्। मुक्तिका एवैता आकलितदन्तरूपपालिद्वयेन चारु बद्धाः सन्तीत्यर्थः। कीदृशीमान्वीक्षिकीं षोडशसङ्ख्याकैः पदार्थैः प्रमाणप्रमेयादिभिर्वस्तुविशेषैरुपलक्षिताम्। कीदृशैः? उद्देशपर्वणि उद्देशकाले लक्षणे लक्षणप्रदानकाले च द्विधोदितैरुद्गतैः उदितैः कथितैर्वा। उद्देशकाले उदितैर्लक्षणकालेऽपीत्यर्थः। कालद्वयकथनाद् द्वैविध्यं प्राप्तैरित्यर्थः। एवं च द्विगुणीकृताः षोडश द्वात्रिंशत्सङ्ख्या भवन्ति। दशनानां तु द्वात्रिंशत् सङ्ख्या प्रसिद्धैव। अत्रापि छलतत्त्वभेदात् मूर्तिद्वयं वेदितव्यम्। उद्देशो लक्षणं परीक्षा चेति त्रैविध्यं शास्त्रक्रमकथनस्य। तत्र संक्षेपेण कथनमुद्देशः। विवृत्य कथनं लक्षणम्। परीक्षा युक्ति-विचारः। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वा-भासच्छलजातिनिग्रहस्थानानीति षोडश पदार्थाः। अयमेवोद्देशः। सम्यगनुभवसाधनं प्रमाणम्। प्रमाणविषयः प्रमेय इत्यादि लक्षणम् ॥८०॥

तर्का रदा यद्वदनस्य तर्क्या वादेऽस्य शक्तिः कथमन्यथा (क्व तथान्यथा) तैः।
यत्नं क्व दातुं गुणशालिपूर्गं क्व वादतः खण्डयितुं प्रभुत्वम् ॥८१॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः। ननु प्रधानानि वाक्यानि शास्त्राणि च तर्काः। यस्या वदनस्य रदा दन्तास्तर्क्यास्तर्काः। तर्का एवैते इति सम्भावयामः। अन्यथा उक्तप्रकारवैपरीत्येन तैः कृत्वा वादे विषये तथा तादृशी क्व शक्तिः, अपि तु न भवत्येव। प्रमाणतर्कसाधनोपालम्भः। सिद्धान्ताविरुद्धः प-[२०४ब]-ञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। किञ्च तैर्विना पत्रं निजगुणोत्कर्ष-सूचकश्लोकादिचिह्नितं, भूर्जतालपत्रादिमयं दातुं प्रतिवादिन उद्दिश्य राजद्वारादावा-लम्बयितुं क्व प्रभुत्वं, अपि तु न क्वापि। गुणशालिनां गुणिनां पूगं समूहं वादतो वादादुक्तलक्षणात् हेतोः खण्डयितुं खण्डितवचनं कर्तुं क्व प्रभुत्वम्। अपि त्वेतत् त्रयं तर्कैर्विना नैव भवतीत्यर्थः। तत्त्वतस्तु वादे भाषणविशेषे पत्रं नागवल्लीदलं दातुं खण्डयितुमिति धत्ते रूपम्। किञ्च पूगं पूगीफलं गुणेन तुवरकषायलक्षणेन शालते गुणशालि, अदतो भक्षयतः सतः, खण्डयितुं फालीकर्तुं क्व वा प्रभुत्वम्। अत्रापि पूर्ववन्मूर्तिद्वयम् ॥८१॥

सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु।

तन्मत्स्यपद्माद्युपलक्ष्यमाणं तत्पाणियुग्मं ववृते पुराणम् ॥८२॥

तत् तादृशं पुराणं ब्राह्मपाद्मप्रभृति किं वेदसंमितं शास्त्रं पञ्चलक्षणं यस्याः पाणि-युग्मं ववृते वृतम्। पुराणं यस्याः पाणीयुग्मीभूतमित्यर्थः। कीदृशम्? व्यासपराशराभ्यां प्रणीतभावात् कृतत्वात् सपल्लवं वृद्धिं गतं उभयीभविष्णु द्विरूपतां गतम्। पुराणानि व्यासपराशराभ्यां सपल्लवानि कृतानि सन्ति द्विरूपतां च प्रापितानि। अत एव तद्विरचितानामुपपुराणत्वम्। केचित् तु तेषामेव द्विरूपत्वमाहुः। पुनः कीदृशम्? मत्स्यपद्मादिभिर्नामावयवैस्तत् प्रवर्तकैर्वा उपलक्ष्यमाणं चिह्नितं मत्स्यपुराणं पद्मपुराण-मित्यर्थः। अनुभयमुभयं भविष्णु उभयीभविष्णु। तत्त्वतस्तु सपल्लवं समानकिसलयं उभयीभविष्णु विदित एव। मत्स्यपद्मादिभिः शुभसूचकैर्लेखामयैरुपलक्षितम्। पूर्ववन्मूर्ति-द्वयमिहापि ॥८२॥

आकल्पविच्छेदविवर्जितो यः स धर्मशास्त्रव्रज एव यस्याः।

पश्यामि मूर्धा श्रुतिमूलशाली कण्ठस्थितः कस्य मुदे न वृत्तः ॥८३॥

जानामि यस्या मूर्धा मस्तकः स तादृशो धर्मशास्त्रव्रजः स्मृतिसमूह एव। अस्या उत्तमाङ्गं स्मृतिकृतमित्यर्थः। स क इत्याह। यो धर्मशास्त्रव्रजः आकल्पविच्छेदविवर्जितः। आकल्पं कल्पं यावत् विच्छेदेन विनाशेन विवर्जितः। स्मृतयः किल कल्पान्तं यावन्नोच्छिद्यन्ते।

अयमपि च मूर्धा कारणगुणादीदृशो दृश्यते। तत्त्वतस्तु, आकल्पस्य नेपथ्यस्य यो विच्छेदोऽभावस्तेन वर्जितो नेपथ्यवानित्यर्थः। तथा श्रुतिर्वेद एव मूलं तेन शाली। स्मृतयो हि वेदान्निर्गताः। अयमपि मूर्धा तादृशः। तत्त्वतस्तु श्रुती कर्णौ, तयोर्मूले बुध्ने, ताभ्यां शाली। [२०४.b] किञ्च यो धर्मशास्त्रवृक्षः कण्ठमध्ये स्थितः सन् कस्य धर्माचरणशीलस्य न मुदे वृत्तो जातः। अपि तु कण्ठपाठभूतः सर्वेषां प्रीतये भवति। नित्याचारस्य तन्मूलत्वात्। मूर्धाप्येवंभूत एव। तत्त्वतस्तु कण्ठे गलोपरिभागे स्थितो धृतः। वृत्तो वर्तुलः। मनोहरत्वात् सर्वेषां प्रीतिजनकः। कस्य ब्रह्मणो वा। छलेन धर्मशास्त्रवृक्षसामग्रीदर्शनान्मूर्धस्तत्कर्तुकत्वं तदध्यारोपश्च मूर्तिद्वयं पूर्ववत् ॥८३॥

भ्रुवौ दलाभ्यां प्रणवस्य यस्यास्तद्बिन्दुना भालतमालपत्रम्।
तदर्धचन्द्रेण विधिर्विपञ्चीनिक्वाणनाकोणधनुः प्रणिन्ये ॥८४॥

विधिर्यस्या भ्रुवौ प्रणवस्योंकारस्य दलाभ्यां शकलाभ्यां कृत्वा प्रणिन्ये ससर्ज। तस्य प्रणवस्य बिन्दुना कृत्वा भाले वर्तमानं तमालपत्रं तिलकं वर्तुलम्। तस्य प्रणवस्यार्धचन्द्ररूपेणांशेन विपञ्च्या वीणाया निक्वाणनाय वादनाय कोणनाम धनुः प्रणिन्ये। इति सर्वत्र संबन्धः। तमालपत्रमिति रूढिवशात् तिलकमात्रे। यौगिकार्थोपादाने हि नार्थोऽत्र संगच्छेत। तमालपत्रस्य सरलत्वाद् बिन्दोश्च वर्तुलत्वेन प्रसिद्धत्वात्। 'कोणो वीणादिवादनम्'। इहापि पूर्ववन्मूर्तिद्वयम् ॥८४॥

द्विकुण्डली वृत्तसमाप्तिलिप्याः कराङ्गुली काञ्चनलेखिनीनाम्।
कैश्यं मषीणां स्मितभाः कठिन्याः काये यदीये निरमायि सारैः ॥८५॥

यदीये काये एतदेतद् वस्तु एतदेतस्य सारैर्निर्मितम्। किं कस्येत्याह। द्वयोः कुण्डलयोः समाहारो द्विकुण्डली। सा वृत्ता वर्तुला चासौ समाप्तिलिपिश्च तस्या निर्मिता। इयं समाप्तिलिपिश्च प्रायः प्रसिद्धैव। करयोरङ्गुली कराङ्गुली शाखिभूता करशाखा काञ्चनलेखिनीनाम्। कैश्यं केशसमूहो मषीणां स्मितकान्तिः। कठिन्याः खटिकायाः सारैरिति प्रत्येकं संबन्धः। एतानि वाङ्मयोपकरणानि ॥८५॥

या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव।
विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव ॥८६॥

येयं भगवती सोमसिद्धान्तमयाननेव। सोमसिद्धान्ताख्यं यत्कापालिकमिति प्रसिद्धम्। तन्मयमाननं यस्याः सेव। शून्यतावादो ग्रन्थस्तन्मयमुदरं यस्याः सेव।

विज्ञानानां सामस्त्यं तन्मयमान्तरं मध्यं यस्याः सेव। साकारतासिद्धिर्ग्रन्थस्तन्मयम-
-खिलं यस्याः सैवेति सर्वगोलप्रेक्षा। अथ च सोमसिद्धान्तो यत्र सोमश्चन्द्र एव
ख्याप्यते। तन्मयाननैवेति चन्द्रसाम्यमद्वैतभावेन शून्यतैवास्तीति। यो वादस्तन्मयमिवोदरं
यस्याः सैवेति उदर-[२०१.७]-सत्तायास्तनुतयाऽनुपलभ्यमानत्वात्। विज्ञानानां
सामस्त्यं तन्मयान्तरे वेति पूर्वस्मादवान्तरभेदः कश्चन भेदोऽस्ति। विश्वे विज्ञानस्यैव
सामस्त्यमस्तीति वादो विज्ञानसामस्त्यमिति कृत्वा साकारतायाः सिद्धिर्निष्पत्तिः परमा
कोटिः सैवेति। शेषं सहृदयैरर्थान्तरं चिन्तनीयमिति स्थितम्। भैम्याः सख्य-
-मिषादियं कविवरेणानेन संश्लेषिता काऽपि व्यस्तसमस्तवाङ्मयमयी वाग्देवता या-
-स्तनुः। शिष्याणामनिशं नलस्य चरितं यत्नादनुध्यायतां नृत्यन्ती रसनाञ्चले
स्खलतु मा मा चित्तवृत्तावपि ॥८६॥

भीमस्त्वयागधत मोदितुं ते वेला किलेयं त्वरितं विधेय।

मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च विचित्रमेषाम् ॥८७॥

तथा भगवत्या भीमो गदितः। किमित्याह। किलेत्यागमे। ईदृश्यां वेलायां हर्ष एव
क्रियते। तस्माद् विवाहं कृत्वा पूर्यताम्। त्वं यदर्थं चिन्तापरोऽसि, तदहं जानामि, तां
चिन्तां मा कुरु। यतो राज्ञां विचित्रं गोत्रं चरित्रं च मया निगाद्यमेत[illegible]मदधीनमित्यर्थः ॥८७॥

विन्दन्त्यसत्ये (त्ये) मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे।

अत्रावतीर्णा गुणवर्णनाय राज्ञां तदाज्ञावशगास्मि काऽपि ॥८८॥

यस्य भगवतश्चरणारविन्दे पादपद्मे असत्येऽविद्यमाने मन्दाकिनी मकरन्दलीलां
विन्दति। गगनं व्यसत् तच्च विष्णुपदं पदं चेत् तर्हि चारुतायोगात्
पद्मत्वमायातम्। पद्मं चेत् तर्हि मकरन्दः। तत्र च स्वर्नदी विद्यत एव। योऽयमीदृशो
विष्णुरित्यर्थः। तस्य भगवत आज्ञया वशवर्तिनी काऽपि राज्ञां गुणवर्णनायात्राऽवतीर्णाऽस्मि।
अस्य वाक्यस्य परमार्थपर्यालोचनया खल्वस्या एव श्रीहर्षसरस्वत्याः किमप्यपूर्वत्वमायाति
॥८८॥

तत्कालवैद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य।

त्रिलोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश ॥८९॥

तत्कालवैद्यैस्तात्कालिकैः शकुनैः पक्षिनिमित्तैः स्वरेण नासापुटसंचारिणा वायुना
आदिशब्दात् निजचित्तप्रसादादिभिराप्तां हि तामवाप्तामकस्मादागतां एष नृपः प्रतीत्य
प्रतीतिं निश्चितां कृत्वा अस्यै च भगवत्यै योग्यां पूजामादिशत् ददौ। अर्थात्

पार्श्ववर्तिनः पुरोधःप्रभृतीन् पुरस्कृत्य। कीदृशः त्रिलोकपाल इन्द्रस्तेन सह एकधुरीण एक धुरावहः। तत्सदृश एवेत्यर्थः। अनेन सपर्यायाः सामग्रीसौकर्यं सौष्ठवं भूयस्त्वं च ॥८९॥

दिगन्तरेभ्यः पृथिवीपतीनामाकर्षकौतूहलसिद्धविद्याम्।
ततः क्षितीशः स निजां तनूजां मध्ये महाराजकमाजुहाव ॥९०॥

ततः स राजा स्वां पुत्रीं राजकस्य राजसमूहस्य मध्ये आकारयति स्मेति राज्ञ एवाख्यानकर्तृत्वेन प्रयत्नातिशयः सूचितः। किञ्च विवाहे प्रदातुः पितुरेवेतिकर्तव्यतायां प्राधान्येऽन्येषामा-[१०१-७]-रम्भकत्वमेवायातम्। किमित्याह। दिगन्तरेभ्यः सकाशात् राज्ञां यदाकर्षणमानयनं तस्य तदेव वा यत् कौतूहलं तत्र तस्य वा सिद्धविद्या माणिभद्रादिका, ताम्। माणिभद्रदैवत्ती विद्या स्वत्वदृष्टवस्तुसमाकर्षणकौतुकं पूरयति। सिद्धयोगिनां मन्त्रविशेषो वा सिद्धविद्याधर्मदर्शनाद् दमयन्त्यां तदध्यारोपः ॥९०॥

दासीषु नासीरचमूषु जातं स्फीतं क्रमेणालिषु वीक्षितासु।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानाम् ॥९१॥

इदानीं तस्या एव वर्णनम्। किं कुर्वतीम्? । अथ पश्चात् स्वाङ्गेषु वीक्षितेषु सत्सु रूपोत्थं सौन्दर्यसंबन्धिनमवलोककानामद्भुताब्धिमाश्चर्यसमुद्रमुद्वेलयन्तीं उद्गतवेलं त्यक्तसीमानं कुर्वन्तीम्। कीदृशमद्भुताब्धिम्। नासीरचमूषु अग्रयानसेनारूपासु दासीषु वीक्षितासु सतीषु जातम्। क्रमेण च सखीषु वीक्षितासु सतीषु स्फीतं प्रवृद्धम् ॥९१॥

स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुमृजांशुकाभाम्।
नेपथ्यहीरद्युतिवारिवर्तिस्वच्छायसच्छायनिजालिजालाम् ॥९२॥

स्निग्धत्वमेव मायाजालं प्रपञ्चकृतमुदकं तस्य लेप उपदेहस्तस्य लोप उत्पुंसनं, तेन कृत्वा सयत्ना विरोधिनो ये रत्नानामंशवस्तेषां मृजा मार्जनं यत्र एवंभूता अंशुकाभा वसनच्छविर्यस्याः सा तथा, ताम्। नेपथ्यहीराणामाभरणवज्रशकलानां द्युतिरेव वारि जलं तत्र वर्तिस्थास्नु स्वच्छायसच्छाय निजप्रतिबिम्बतुल्यं निजमालिजालं सखीसमूहो यस्याः सा तथा ताम्। यस्या भूषाहीरेषु स्वप्रतिच्छायिका समूहरूपाः सर्वाः सख्यः प्रतिबिम्बिताः सन्तीत्यर्थः ॥९२॥

विलेपनामोदमुदागतेन तत् कर्णपूरोत्पलसर्पिणा च।
रतीशदूतेन मधुव्रतेन कर्णे रहः किञ्चिदिवोच्यमानाम् ॥९३॥

मधुव्रतेन भ्रमरेणैव रतीशस्य दूतेन कर्णे लगित्वा रह उपांशु किञ्चिदतीव गोपनीयं

कार्यमुच्यमानामिव । कीदृशेन ? । विलेपनस्य यक्षकर्दमोद्देशामोदेन परिमलेन 55b मुत-
-प्रीतिस्तया कृत्वा प्रथममागतेन । अनन्तरं कर्णपूरोत्पलसर्पिणा श्रवणाभरणकमल-
-संश्रितेन ॥९३॥

विरोधिवर्णाभरणाश्मभासां मल्लाजिकौतूहलमीक्षमाणाम् ।
स्मरस्य चापभ्रमचालिते नु भ्रुवौ विलासाद्वलिते वहन्तीम् ॥९४॥

विरोधिनो वर्णाः पीतहरितरक्तादयो येषामेवंभूता ये आभरणानामश्मानो मणयस्तेषां भासः कान्तयो विरोधिवर्णा वा अश्मभासस्तासां मल्लानामाजेर्नियुद्धस्य कौतुकं पश्यन्तीम् । नु जाने । स्मरेण स्वचापभ्रान्त्या चालिते धृते स्वः । ईदृशौ विभ्रमाद् भ्रान्त्या [२१०·a] भ्रुवौ धारयन्तीम् ॥९४॥

साभोदपुष्पाशुग[1]वासिताङ्गीं किशोरशाखाग्रशयालिभास्ताम् ।
वसन्तलक्ष्मीमिव राजभिस्तैः कल्पद्रुमैरप्यभिलष्यमाणाम् ॥९५॥

पुनः कीदृशीम् ? सामोदेन सहर्षेण पुष्पाशुगेन स्मरेण वासितमधिष्ठितमङ्गं यस्यास्ताम् । किशोराणि बालानि यानि शाखाग्राणि पल्लवास्तद्वच्छायाः पाणयो यासामेवंभूता या आलयः सख्यस्ताभिः कृत्वा भासते शोभत इति किशोरशाखाग्रशयालिभास्ताम् । अत एव तैस्तादृशैः प्रसिद्धमहिमभिरपि राजभिरभिलष्यमाणाम् । कामिव । वसन्तलक्ष्मीमिव । कैः ? कल्पद्रुमैरपि । यथा मधुश्रियं सुरतरचोऽपि स्पृहाविषयतां नयन्ति । तामपि कीदृशीम् ? सामोदः सपरिमलो यः पुष्पाणामाशुगो वायुस्ते[2]न वासितं सुरभितमङ्गं यस्यास्ताम् । तथा किशोरेषु बालेषु शाखाग्रेषु शेरते ध्रियन्ते किशोरशाखाग्रशयास्ते च ते भृङ्गा अलयस्तैः कृत्वा भास्वच्छविर्यस्याः सा तथा । वसन्तश्रीः खल्वीदृशेन मरुता भ्रमरैश्चेदृशै-
-रतीव भाति ॥९५॥

पीतावदातारुणनीलभासां देहोपदेहात्किरणैर्मणीनाम् ।
गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान् पुनरुक्तयन्तीम् ॥९६॥

किं कुर्वन्तीम् ? । गोरोचना च चन्दनं च कुङ्कुमं च एणनाभी च तासां विलेपान् यथा स्थानोपदेहान् पुनरुक्तयन्तीं यथासङ्ख्यं द्विगुणयन्तीम् । कस्मात् ? । पीता च अवदाता च अरुणा च नीला च एवं रूपाभासो येषां ते, तेषां मणीनां किरणैः कृत्वा देहस्योपदेहादुपलेपात् ॥९६॥

स्मरं प्रसूनेन शरासनेन ऐतारमश्रद्दधतीं नलस्य ।
तस्मै स्वभूषादृषदंशुशिल्पं बलद्विषः कार्मुकमर्पयन्तीम् ॥९७॥

पुष्पेण धनुषा नलस्य परिभावुकं कामं न प्रतियतीम् । अत एव तस्मै स्मराय

1. B1, 8 -यालिमालाम् । 2. B1. भ्रि- (marginalia)

निष्कलङ्कृति रत्नकान्तिकृत्तं बलद्विष इन्द्रस्य कार्मुकं धनुः समर्पयन्तीम्। अर्थात् तल्पयाय ऐन्द्रं धनुर्नानावर्णविशिष्टं दृष्टं प्रसिद्धमेव। अथ च येन धनुषा बलं द्विषन्तं हतवानिन्द्रः इति पारम्पर्येण तद् धनुषः शक्तिमत्ता द्योत्यते ॥९७॥

विभूषणेभ्यो वरमंशुकेषु ततो वरं सान्द्रमणिप्रभासु।

सम्यक् पुनः क्वापि न राजकस्य पातुं दृशा धातृधृतावकाशाम् ॥९८॥

कीदृशीम्? राजकस्य राजसमूहस्य दृशा कृत्वा धात्रा कृतोऽवकाशोऽन्तरं यस्यास्ताम्। क्व क्वेत्याह। विभूषणेभ्यः सकाशाद् वरमधिकमंशुकेषु वस्त्रेषु। ततस्तेभ्योऽंशुकेभ्यः सकाशाद् वरमधिकम्। मणीनां प्रभासु सम्यक् सम्पूर्णतया पुनर्न क्वापि धृतावकाशामित्यर्थः। अङ्गानि तावद् भूषणैः सं[स्था]पितत्वात् दृश्यन्त एव। वस्त्रैराच्छादितत्वात् भूषणानि मनागिव दृश्यन्ते। सान्द्रमणिप्रभा-[रश्मि]भिः स्थगितत्वात्। ततोऽधिकमंशुकानि किञ्चिदिव दृश्यन्ते। आच्छादनरहितत्वात् प्रायः सान्द्रमणिप्रभा एव यस्या दृश्यन्त इत्यर्थः ॥९८॥

प्राक्पुष्पवर्षैर्वियतः पतद्भिर्द्रष्टुं न दत्तामथ तद्द्विरेफैः।

तद्भीतिभुग्नेन ततो मुखेन विधेरहो वाञ्छितविघ्नयत्नः ॥९९॥

कीदृशीम्? द्रष्टुं न दत्तां पश्यतेति नानुमताम्। कैः? वियतः सकाशात् पतद्भिः पुष्पवर्षैः। कदा? प्राक्। पश्चात् तेषां पुष्पवर्षाणां द्विरेफैर्भृङ्गैः। ततोऽप्यनन्तरं तेषां द्विरेफाणां भीत्या भुग्नेन वक्रितेन मुखेन द्रष्टुं न दत्तामिति सम्बन्धः। यत एवमत एवाहो पश्यत। विधेर्वाञ्छितेऽर्थे योऽसौ विघ्नस्तत्र यत्नः। अस्तीति गम्यम्। अथवा एतत् प्रथमत एव प्रतिज्ञारूपतया व्याख्येयम्। अन्यत् त्रयं हेतुत्वेन यथा अहो विधेर्वाञ्छितार्थविघ्ने महान् यत्नः। कथमेवं ज्ञायत इत्याह। यत् कारणात् प्राग् वियतः पतद्भिः पुष्पवर्षैर्द्रष्टुं न दत्तेत्यादि ॥९९॥

एतद्वरं स्यामिति राजकेन मनोरथातिथ्यमवापिताय।

सखीमुखायोत्सृजतीमपाङ्गात् कर्पूरकस्तूरिकयोः प्रवाहान् ॥१००॥

किं कुर्वतीम्? अक्ष्णः शुक्लकृष्णत्वादपाङ्गात् सकाशात् सख्या मुखाय कर्पूरकस्तूरिकयोः प्रवाहानुत्सृजतीं प्रमुञ्चन्तीम्। वयस्यास्यं कटाक्षैर्वीक्षमाणामित्यर्थः। कीदृशाय? नृपसमूहेन इति मनोरथस्याभिलाषस्यातिथित्वं गन्तव्यं प्रापिताय। इति कथमित्याह। अहं वरं सम्यक् एतद् दमयन्तीसखीमुखं स्यां भवेयमिति। यदि ह्यहमेतद् भवामि, तदा दमयन्तीकटाक्षच्छटाच्छुरितोऽहं धन्यो भवामीति। वरमिति प्रकारान्तरेभ्यो वैशिष्ट्यार्थमव्ययं क्रियाविशेषणप्रतिरूपकम्। यथा वरं कूपशताद्वापीति ॥१००॥

स्मितेच्छुदन्तच्छदकम्पकिञ्चिद्दिगम्बरीभूतरदांशुवृन्दैः ।

आनन्दितेन्दीवरमुखारविन्दैर्मुदं नुदन्तीं हृदि कौमुदीनाम् ॥१०१॥

किं कुर्वतीम्? कौमुदीनां हृदि वर्तमानां मुदं वैशद्यं हर्षं नुदन्तीमपनयन्तीम्। कैः कृत्वा? ततोऽप्यधिकैः स्मितेच्छू ईषद्धसिताभिलाषुकौ यौ दन्तच्छदावोष्ठौ तयोः कम्पवशात् किञ्चिन्मनागदिगम्बराः सन्तो दिगम्बरा भूता दिगम्बरीभूताः, सम्यग् दृश्या ये रदा दन्तास्तेषामंशवस्तेषां वृन्दानि, तैः। तैः कीदृशैः? आनन्दितान्यवनीन्द्राणां मुखारविन्दानि यैरिति कौमुदीनां हृद्गतहर्षप्रमोचनहेतुः। कौमुदीनां श्वेतत्वनिर्माणे जन्मान्तरेऽपि शक्ति- -र्नास्ति तच्च प्रसिद्धमेव। न हि कौमुदीसमुदयेऽरविन्दानामानन्दोऽपि तु कम्पनेन सूचितो विषाद एव ॥१०१॥

प्रत्यङ्गभूषाच्छमणिच्छलेन यल्लग्नतन्निश्चललोकनेत्राम् ।

हाराग्रभाग्‌गरुडाश्म-[211-a]-रश्मिपीनाभनाभीकुहरान्धकाराम् ॥१०२॥

कीदृशीम्? सर्वाङ्गेषु ये भूषाणां मणयस्तेषां छलेन मिषेण। यानि पूर्वं लग्नानि तानि पश्चाद् रूपं लोभवशान्निश्चलानि लोकानां नेत्राणि यस्यामिति गम्या सम्भावना। तथा हारस्याग्रे नायिकापदे आगते विद्योतमानो यो गरुडाश्मा नीलमणिस्तस्य रश्मिभिः पीनाभं मांसलच्छवि नाभीकुहरस्यान्धकारं यस्या इति गम्भीरनाभीप्रकटविवराश्रित- -हाराग्रस्थितनीलतरलदर्शनं स्मरविभ्रमवशात् कञ्चुकोपरिहारपरिधानं विदग्धधूर्तां च चीनांशुकमयं कञ्चुकं लीनमिवाङ्गे भवति नाभितश्चोपरितनमेव ॥१०२॥

सद्गौरसारस्मितविस्मितेन्दुप्रभाशिरःकम्पकचोऽभिनेतुम् ।

विपाण्डुतामण्डितचामरालीनानामरालीकृतलास्यलीलाम् ॥१०३॥

कीदृशीम्? विपाण्डुतयाऽतिसितत्वेन मण्डिता चामराणामाली (पङ्क्तिः) पङ्क्तिः (श्रेणयः)- -स्ता एव नाना अनेका मराल्यो हंसवध्वस्ताभिः कृता लास्यलीला नृत्यविभ्रमो यस्यामितस्ततः श्वेतचामरलुलनभूयस्त्वकथनम्। किं कर्तुमाभिः कृता लास्यलीला इत्याह। अभिनेतुं व्यञ्जयितुम्। का इत्याह। तस्या गौरगुणसारं यत् स्मितं तेनातीव चारुतया विस्मिता या इन्दोः प्रभाः कान्तयस्तासां शिरसः कम्पस्य रुचः श्रियः। एतस्या गौरिमगर्भस्मितदर्शनविस्मिताश्चन्द्रकान्तय एव सुष्ठु मूर्धधूननं कुर्वन्ती- -त्यभिनयपुरःसरं प्रदर्शयितुमिवेत्यर्थः ॥१०३॥

तदङ्गभोगावलिगायनीनां मध्ये निरुद्धस्वरकुण्ठितानाम् ।
स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदो मण्डनमर्पयन्तीम् ॥१०४॥

पुनः किं कुर्वतीम् । स्वयमात्मना धृतां हृदो हृदयस्य मण्डनरूपां ह्रियं प्रसादत्वेना-प्सरसां स्वर्वेश्यानामर्पयन्तीम् । प्रसाददाने हेतुगर्भं विशेषणमाह । तस्या या अङ्ग-भोगावल्यो मण्डनविलेपनादिसूचकगीतच्छन्दोविशेषास्तेषां गायन्त्यस्तासाम् । तन्नामाङ्कित-गीतकविशेषं गायन्तीनामित्यर्थः । किमिति दमयन्तीत्रपायास्तासु संक्रम इत्याह । यतो मध्ये गेयस्यापरिसमाप्तावेव निरुद्धेर्निश्चितवचनस्य क्रमे परिमार्ष्ट्यां कुण्ठितानां भग्नमुखानाम् । गुणानां बहुत्वात् वक्तुमशक्तानामित्यर्थः । अत एव तासां लज्जा । अन्योऽपि प्रभुः केषांचिद् गुणिनां गुणैरनुरञ्जितस्तेषां निजहृदयवर्तमानामेकावलीं ददाति । पूज्यानुग्रहादेरभावात् सम्प्रदानाभावेऽप्सरसामिति संबन्धमात्रे षष्ठी । तत्र हि तासामवश्यं तादृशस्य प्रसादस्यार्पणं युक्तम् । अत एवार्पयन्तीमित्युक्तं न तु ददतीमिति । इत्यादिविषये ददातेरपि प्रयोगे षष्ठ्येव भवति । यथा-'शस्त्रो दण्डं ददाति' इति । [ध्वन्तः [२।१।७]] पृष्ठं ददाति' च । दायादस्य शतं दत्ते वस्त्राणि रजकस्य च । सामान्यकन्यानामपि विवाहे यथायोगं युवतयो भोगावलीर्गायन्त्येव ॥१०४॥

तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम् ।
आकण्ठमक्ष्णोर्द्वितयं मधूनि महीभुजः कस्य न भोजयन्तीम् ॥१०५॥

किं कुर्वतीम् ? जयन्तीम् । किं केनेत्याह । रदानां दन्तानां रुचा कृत्वा तारा नक्षत्राणि जयन्तीम् । वदनस्य रुचा चन्द्रं जयन्तीम् । कचानां केशानां रुचा च नभः खं जयन्तीमिति सर्वत्र संबध्यते । अत एव निजदर्शनेन कृत्वा कस्य महीभृतो राज्ञः अक्ष्णोर्द्वितीयमाकण्ठमातृप्तेर्मधूनि न भोजयन्तीम् । अपि तु सर्वेषां राज्ञां नयनद्वयं यथेष्टं मधूनि भोजनं कारयन्तीमित्यर्थः । मधुपानातिशयजां प्रीतिमुत्पादयन्तीमिति भावः । आकण्ठमित्याद्युपचारवृत्त्या ॥१०५॥

अलङ्कृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम् ।
इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः ॥१०६॥

अथ नृपश्रेणी इमां विमानेन कृत्वा सभां प्रविशन्तीं सतीं नेत्रान्तैः सादरमपश्यत् । कीदृशीम् ? । अलङ्कृतेभ्योऽङ्गेभ्यः सकाशादद्भुतानि केवलान्यनलङ्कृतानि अङ्गानि यस्यास्तां तथा सा । तेभ्योऽधिकाऽध्यक्षा निवेद्या प्रत्यक्षलक्ष्या लक्ष्मीर्यस्यास्ताम् ।

एतच्चात्रैव दृश्यते न ह्यन्यत्रानलङ्कृतमङ्गमलङ्कृता क्वापि चारुतया विशिष्टं
दृष्टं स्तुत्यत्वाच्च प्रत्यक्षम् । कुलकम् ॥१०६॥

आसीदसौ तत्र न कोऽपि भूपस्तन्मूर्तिरूपोद्भवदद्भुतस्य ।
उल्लेसुरङ्गानि मुदा न यस्य बिभिद्य रोमाङ्कुरदन्तुराणि ॥१०७॥

तत्र सभायां स कोऽपि नासीत्, यस्याङ्गानि बिभिद्य कण्टकितैः रोमाङ्कुरैर्दन्तुराणि
विसंष्ठुलानि सन्ति मुदा कृत्वा उल्लसितानि । कीदृशस्य ? तस्या मूर्तौ यद्रूपं
तेनोद्भवदुत्पद्यमानमद्भुतमाश्चर्यं यस्य स तथा तस्य ॥१०७॥

अङ्गुष्ठमूर्ध्ना बिनिपीडिताग्रा मध्येन भागेन च मध्यमायाः ।
आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ॥१०८॥

नाम भोः सर्वजनविदितं वा । तत्र सभायां भैमीमवलोक्य केन जनेन तर्जनी
नामाङ्गुली नास्फोटिता । यथा श्रुता तथैवेयमित्यर्थः । प्रतिपादनाथ सर्वैरपि तर्ज-
-न्यास्फोटितेत्यर्थः । कीदृशी ? । अङ्गुष्ठस्य मूर्ध्ना च मध्यमाया मध्येन भागेन
च पीडितमग्रं यस्याः सा तथेत्यभिनयविषयचिच्छोटिकाविशेषोऽयम् ॥१०८॥

अस्मिन्समाजे मनुजेश्वरेण तां खञ्जनाक्षीमवलोक्य केन ।
पुनःपुनर्लोलितमौलिना न भ्रुवोरुदक्षेपितरां द्वयी च ॥१०९॥

तस्यां सभायां तां [श्लो.२.ब] खञ्जननेत्रां वीक्ष्य भूयो भूयो धुतशिरसा
सताऽऽश्चर्यवशात् केन वा राज्ञा भ्रुवोर्द्वयी नोदक्षेपितरामपि तु सर्वैरपि भृशमुत्क्षिप्ता ॥१०९॥

स्वयंवरस्याजिरमाजिहानां विभाव्य भैमीमथ भूमिनाथैः ।
इदं मुदा विह्वलचित्तभावाद्वादि खण्डाक्षरजिह्मजिह्वम् ॥११०॥

अथ स्वयंवरस्याङ्गणमागच्छन्तीं भैमीं समीक्ष्य प्रीत्या विकलचित्तत्वाद् दर्ध-
-वर्णविकलरसनं यथास्यादेवमिदं वक्ष्यमाणमुक्तम् ॥११०॥

रम्भादिलोभात् कृतकर्मभिर्मा शून्यैव भूर्भूत्सुरभूमिपान्थैः ।
इत्येतयालोपि दिवोऽपि पुंसां वैमत्यमत्यप्सरसा रसायाम् ॥१११॥

अतिक्रान्ता अप्सरसो यया सा अत्यप्सरास्तया । तादृश्या एतया रसायां भूमौ
वर्तमानया पुंसां दिवोऽपि स्वर्गस्यापि वैमत्यं विमतिभावो लुप्तः । कस्मात् ? ।
इति कारणात् । इति कथमित्याह । रम्भादीनामप्सरसां लोभेन कृतकर्मभिर्विहितयज्ञ-
-व्रततपःप्रभृतिभिः सुरभूमेः पान्थैः कृत्वा भूः पृथ्वी शून्या रिक्तैव मा भूदिति ।

विरुद्धा विशिष्टा वा मतिर्येषां, तेषां भावो वैमत्यम्। इयं भूः स्वर्गापेक्षया न किञ्चित्। तत्र हि रम्भोर्वशीतिलोत्तमाप्रभृतयोऽप्सरसः सौन्दर्यपात्रभूताः सन्ति। तस्मात् तत्कर्म करिष्यामो येन दिवं गत्वा ताः प्राप्यन्त इति वैमत्यवशात् सर्वैरपि पुंभिः कृत्वा भूमिः शून्यैव मा भवत्विति एतयाप्सरोभ्योऽप्यधिकतमरूपया भूमाववतीर्य तेषामियं मति-लुप्ता इयमप्सरोभ्योऽधिका चेद् भूमावेवास्ति तर्हि दुष्कराणि कर्माणि कृत्वाऽप्सरसां कृते दिवं गन्तुं किमिति कायः क्लेश्यत इति तेषामेतयोपदिष्टमित्यर्थः। यदि हीयम-न्यप्सरा भुवि नावातरिष्यत् तदाप्सरोऽर्थं कर्म कृत्वा दिवं गमद्भिः पुरुषैः कृत्वा भूमिः शून्यैवाभविष्यत् ॥११२॥

रसस्य शृंगार इति श्रुतस्य क्व नाम जागर्ति महानुदन्वान्।

कस्मादुदस्थादियमन्यथा श्रीर्लावण्यवैदग्ध्यनिधिः पयोधेः ॥११३॥

नाम सम्भावने। शृङ्गार इति नाम्ना श्रुतस्य प्रसिद्धस्य रसस्य द्रवविशेषस्य महान-तिगम्भीरोऽनन्तश्च उदन्वान्समुद्रः क्व जागर्ति पूर्णः समुदितोऽस्तीति प्रतिज्ञा सत्ताया निश्चयः परं क्वापि दूरवर्तित्वात् न दृश्यते। ननु कथमेवं प्रतिजानीते भवानित्याह। अन्यथा चेदेवं न भवेत् तर्हि लावण्यवैदग्ध्ययोर्निधिरियं श्रीः कस्मात् पयोधेरुदस्था-दुदतिष्ठत्। यदि सप्तसमुद्रास्तेभ्य एतस्या उत्थानं न सम्भवति। तेषु मध्ये खलु दुग्धाब्धेरेव प्राधान्यं तस्मादुत्थिता या श्रीस्तत इयमतीवतरां विशिष्यते। किञ्च तस्यां लावण्यं वैदग्ध्यं नास्ति। यदि हि तस्यां तद् द्वयं भवेत् तदा स्त्रियो तद्द्वयव-र्जिता न भवेयुरिति भगवति विष्णौ वर्तमाना गुणसामग्री लक्ष्मीं विनाप्यासीदन्यथा सर्वान् देवदैत्यवरान् विहाय सा तं न वृणुयात्। भगवांश्च लक्ष्मीसंश्रयजनकृतिपरवशो न भवत्यचिन्तनीयमहाप्रभावत्वात् ॥११३॥

साक्षात्सुधांशुर्मुखमेव भैम्या दिवः स्फुटं लाक्षणिकः शशाङ्कः।

एतद्भ्रुवौ मुख्यमनङ्गचापं पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥११४॥

साक्षात्सुधांशुः प्रत्यक्षः प्रातिपदिकः पीयूषरश्मिरस्या एव मुखं स दिवि वर्तमानः स्फुटं प्रकटमेव लाक्षणिको लक्षणनिष्पन्नः यथा षष्ठी बहुवचनं आम् साक्षात् नद्या ऐ आसासाम्। आमोचाम् इति सूत्रद्वयनिष्पन्नः आम् लाक्षणिकः लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तो विधिर्बलवानिति न्यायो वर्तत एव। तत्त्वतस्तु साक्षा-न्मौकर्यात् प्रत्यक्षः। दिवि वर्तमानो दूरवर्ती। लक्षणेन लाञ्छनेन चरतीति लाक्षणिकः।

किञ्च मुख्यं प्रधानमनङ्गस्य चापमेतस्या भ्रुवौ तत्पुनः पुष्पं गुणमात्रवृत्त्या। गौणवृत्त्ये-
-त्यर्थः। मुख्या गौणी लक्षणा चेति तिस्रो वृत्तयः। यः शब्दो गवादिर्यत्र खुरककुद-
-सास्नादिमति पदार्थे सङ्केतितस्तत्र वर्तमानो मुख्यः। बहुभारवाहनादिगुणयोगाद्-वात्
वाहीके वर्तमानो गौणः। यथा गौर्वाहीकः। एवं व्याकरणेऽपि राजराजपुरुषादौ लोकव्यव-
-हारेऽपि गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्यायोऽस्त्येव। तत्त्वतस्तु मुख्ये वक्ते
भ्रवं मुख्यमस्त्येव। गुणः परिमलसौकुमार्यादिलक्षणः गुण एव गुणमात्रं तेन वृत्ति-
-र्व्यवहारो गुणमात्रवृत्तिस्तया। उपचारमात्रेण कामचापव्यवहार एतत्पुनरेतद्भ्रूलक्षणं
गुणसंस्थानादिसद्भावात् मुख्यमित्यर्थः ॥११४॥

लक्ष्यं धृते कुण्डलिके सुदत्या ताटङ्कयुग्मं स्मरधन्विने किम्।
सव्यापसव्यं विशिखा विसृष्टास्तेनैतयोर्यान्ति किमन्तरेव ॥११५॥

सुदत्या भैम्या ताटङ्कयुग्मं कुण्डलिके कुण्डलिकाद्वयं लक्ष्यं शरव्यं धृतमवस्था-
-पितमसित। अपि तु ताटङ्कयुग्मरूपं कुण्डलिकाद्वयमेव शरव्यमिदं परिकल्पितमस्ती-
-त्यर्थः। कस्मै शर एव धन्वी तस्मै। किं वा तेन धन्विना सव्यापसव्यं दक्षिणा-
-दक्षिणं यथा स्यादेवं विमुक्ताः शरा एतयोरन्तरे मध्ये यान्ति किं वेति द्वयं
समुचितमेव सम्भावने ॥११५॥

तनोत्यकीर्तिं कुसुमाशुगस्य सैषा वतेन्दीवरकर्णपूरौ।
यतः [213-a] श्रवःकुण्डलिकापराद्धशरं खलः ख्यापयिता तयाभ्याम् ॥११६॥

वत कष्टम्। सा एषा भैमी इन्दीवरे एव कर्णपूरौ कर्णाभरणे स्मरस्याकीर्तिं तनोति।
मेचकत्वादकीर्तिरिवेयं कामस्य यत्कर्णपूरीकृतमिन्दीवरद्वयमस्याः। यतः खलो दुर्जन
आभ्यामिन्दीवरकर्णपूराभ्यां कृत्वा तं कुसुमाशुगं श्रवःकुण्डलिकापराद्धशरं ख्यापयिता
प्रसिद्धिं नेष्यति। श्रवसोः कुण्डलिकयोरपराद्धश्च्युतः शरो यस्य तम्। कुसुमाशुगस्य
हि नीलेन्दीवरं शरो युज्यते। श्रवःकुण्डलिका च ताटङ्करूपा सा च स्मरस्य लक्ष्य-
-तया निरूपितैव तत्समीपवर्ति कर्णपूरीकृतं नीलेन्दीवरं लक्ष्यच्युतपुष्पशरशरत्वेन
सम्भाव्यत एव। दुर्जनानामयं स्वभावो यत् परस्य परमाणुप्रमाणमपि दूषणं
मेरुपर्वतीकृत्य सर्वत्र प्रख्यापयन्ति ॥११६॥

रजःपदं षट्पदकीटजुष्टं हित्वात्मनः पुष्पमयं पुराणम्।
अधात्मभूराद्रियतां स भैम्या भ्रूयुग्मयन्त्र धृतभुग्नि चापम् ॥११७॥

स आत्मभूः स्मरोऽधे भैम्या भ्रूयुग्ममेव चापमाद्रियतां स्वीकरोतु। कीदृशम्।
अन्तर्मध्ये साक्षाद्धृतो मुष्टिर्ग्रहणयोग्यं स्थानं येन तत् तथा। किं कृत्वा आद्रिय-
-तामित्याह। आत्मनः सर्वकालसंबन्धि पुष्पमयं धनुर्हित्वा। यतः पुराणं जीर्णम्।
कथं ज्ञायते तत् पुराणमित्याह। रजसो रेणोः परं स्थानं मधुपा एव कीटा घुणास्तै-
-र्जुष्टं सेवितं भक्ष्यमाणमित्यर्थः। एतद् द्वयं च धनुषः पुराणत्वं बोधयत्येव। घुण-
-क्षतात् पुराणकाष्ठादेः रजो भवत्येव। तत्त्वतस्तु रजोऽत्र परागः। षट्पदसंसर्ग-
-श्चास्त्येव। भैम्या भ्रूयुग्ममेव चापं पुराणनिषेधान्नूतनमिति युक्तितो लभ्यते।
विशेषनिषेधे सामान्यानुरूपगमात् ॥११७॥

पद्मान् हिमे प्रावृषि खञ्जरीटान् क्षिप्नुर्यमादाय विधिः क्वचित्तान्।
सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृग्द्वयमेतदीयम् ॥११८॥

विधिस्तेन सारेण स्थिरांशेन कृत्वा वर्षे वर्षे उच्चैरतिशयेनैतदीयदृग्द्वयं
पुष्णात्युपचिनोति। तेन केनेत्याह। यं सारमादाय हिमे तुषारर्तौ पद्मान् प्रावृषि
खञ्जरीटान् क्वापि क्षिप्नुः क्षेपणशीलः आदानार्थात् तेभ्यः। गम्योऽत्र सम्भावना।
हिमे हि पद्मानि नीरसानि भूत्वा नाशं यान्ति। प्रतिवर्षं खञ्जरीटाश्च निःश्रीका
भूत्वा क्वापि निलीयन्ते। अस्याश्च नयने प्रतिवर्षं तद्द्वयगुणेनोपचीयमाने दृश्यते ॥११८॥

एतद्दृशोरम्बुरुहैर्विशेषं भृङ्गा जनः पृच्छतु तद्गुणज्ञौ।
इतीव धात्राकृत तारकालिस्त्रीपुंसमाध्यस्थमिहाक्षियुग्मे ॥११९॥

उत्प्रेक्षते। धात्रा इति कारणाद्दिहास्मिन्नस्या अक्षियुग्मे तारकालिस्त्रीपुंसमाध्यस्थ-
-मकृ-[213.b]-त। तारके एवालिस्त्रीपुंसौ भ्रमरमिथुनं तयोर्माध्यस्थ्यं मध्यस्थत्वम्।
मध्ये तिष्ठतीति मध्यस्थः साक्षिभेदः। तत्त्वतस्तु साक्षात्कारेणाक्षियुग्मे मध्येऽन्तर-
-भागे स्थितिरस्त्येव। इति किमित्याह। एतद्दृशोरम्बुरुहैः सह यो विशेष आधिक्यं
जनो लोको भृङ्गौ पृच्छतु। यतस्तेषामम्बुरुहाणां गुणं जानीतस्तद्गुणज्ञौ। यो हि
यद्गुणान् जानाति स एव पृच्छ्यते। भृङ्गाणां चाम्बुरुहैः सह सार्वकालिकः
संसर्गोऽस्त्येव ॥११९॥

व्यधत्त सौधे रतिकामयोस्तद्भवत्तं वयोऽस्या हृदि वासभाजोः।
तदङ्गजातं पृथुशातकुम्भकुम्भौ न सम्भावयति स्तनौ कः ॥१२०॥

यद्वयो यौवनलक्षणमस्या हृदये वासभाजोर्नित्यविहितस्थित्योर्द्वयो रतिकामयोर्द्वे सौधे प्रासादविशेषौ व्यधत्त। कीदृशी वयः? । तयोर्विषये भक्तं सेवाश्रद्धालु। यो हि यस्मिन् देवे भक्तो भवति, सो हि अवश्यं तस्यालङ्करयति। अत एव स्तनावस्या--स्तयोः सौधयोर्भ्रान्तावलिस्पष्टौ पृथू[1] विपुलौ शातकुम्भकुम्भौ कनककलशौ को न सम्भावयति। अपि तु सर्वेऽप्यवलोकका लोकास्तावेवं तर्कयन्ति। अवयव--दर्शनेन च प्रायेणावयवी प्रतीयते। तच्यतस्तु ताभ्यां रतिकामाभ्यां भक्तं प्रकटितम्॥१२०॥

अस्या भुजाभ्यां विजिताद्विसात्किं पृथक्करोऽगृह्यत तत्प्रसूनम्।
इहेक्ष्यते तन्न गृहाः श्रियः कैर्न गीयते या कर एव लोकैः॥१२१॥

अस्या भुजाभ्यां कर्तृभ्यां विजिताद्विसान्मृणालात् सकाशात् पृथक् प्रत्येकं किं करोऽगृह्यत बलिर्गृह्यते स्म। किं वस्त्वित्याह। तस्य प्रसूनं कमलम्। यो हि येन जितो भवति, स तस्मात् किमपि प्रधानभूतं वस्तु करमादत्ते। बिसस्य च पुष्पं प्रधानभूतं वस्तु। कथमेवं ज्ञायत इत्याह। तत् तस्य प्रसूनमिह भुजयोर्वर्तमानं श्रियो गृहलक्ष्म्या वेश्म कैर्लोकैर्नेक्ष्यते, अपि तु श्रिया समधिष्ठितं सर्वैरवेक्ष्यते। कर एव कैर्न गीयते। अपि तु भैमीभुजद्वयाग्रवर्तमानः कर एव नाम्ना वर्ण्यते। कमलं हि श्रियो गृहाय यन्मूलमस्याः कमलेति नाम। तच्यतस्तु दमयन्तीकर--कान्तिरेव श्रीः। बिसप्रसूनमिति रूढित एव राजीवनाम। गृहशब्द एकार्थेऽपि पुंसि बहुवचनान्त एव। बिसप्रसूनं च भैमीकरत्वेन परिणतमतीव सश्रीकम्॥१२१॥

छद्मैव तच्छाम्बरजं विशिन्यास्तत्पद्ममस्यास्तु भुजाग्रसद्म।
उत्कण्टकादुद्गमनेन नालादुत्कण्टकं शातशिखैर्नखैर्यत्॥१२२॥

तद् विशिन्याः[2] पद्मिन्याः पद्मं कमलं छद्मप्रपञ्च एव नूनं साम्यया। यत--स्तत् कीदृशम्? । शम्बराद् दैत्यात् जातं शम्बरजम्। माया हि शाम्बरी, तर्हि तात्त्विकं पद्मं किं तदाह। तात्त्विकं प्रसिद्धं पद्मं [214.a][3] तदस्या भैम्या भुजाग्र--सद्म पाणिनामेत्यर्थः। तत्किमित्याह। यदेतद् भुजाग्रसद्मपद्मम्[4] उत्कण्टकम्। कैः कृत्वा? नखैः। कीदृशैः? शातशिखैः घटिततीक्ष्णकोटिभिः। कस्माद्धेतोः? उत्कण्टकान्नालादुद्--गमनेन जन्मना। एतद्धि कारणानुरूपं कार्यं, तत् तु शाम्बरजत्वाद् भ्रान्तिरेव। तच्यतस्तु शम्बरमम्बु ततो जन्म यस्येति॥१२२॥

---

1. B. विशालौ 2. B1 om. पद्मिन्याः पद्मं. 3. B1. om. -सद्मपद्मं. 4. B. तत्.

जागर्ति मर्त्येषु तुलार्थमस्या योग्येति योग्यानुपलम्भनं नः।
यद्यस्ति नाके भुवनेऽथवाधस्तदा न कौतस्कुतलोकबाधः ॥१२३॥

अस्यास्तुलार्थं समीकरणाय मर्त्येषु जागर्ति प्रकाशा वर्तते इत्यत्र नोऽस्माकं योग्यानुपलम्भनम्। यदि भूमण्डलेऽस्याः सादृश्यायास्ति, तर्हि किमिति वयं न पश्यामः। शृणुमो वा भूमौ वर्तमानाया दर्शने श्रवणे च वयमपि योग्याः स्म। तस्मादत्रार्थे योग्यानुपलम्भनं नाम दूषणम्। यथा कोऽपि प्राह-'गजोऽत्र गच्छन्नस्तीति', तत्र च समग्रदर्शनसामग्रीकः सन् चक्षुर्न पश्यतीति दूषणं भवति चेत्सोऽपि पश्यति, यस्मान्न पश्यति, तस्मान्नास्त्येव। किञ्च। अस्यास्तुलनार्थं योग्या यदि नाकेऽस्ति अथवा अधोभुवने पाताले तदा कौतस्कुतलोकबाधो न भवेत्। अपि तु तदा कौतस्कुत लोकबाधो (बाधः) स्यात्। कुतः कुतः समागताः कौतस्कुतास्तेषां बाधो घातो वृथागमनत्वात्। यदि हि तादृशी तत्र भवेत् तदा ते ते तत्रत्या राजन्या नेहागच्छेयुरेतद् दर्शनाय। तद् दर्शनेनैवतत्कार्यस्य सिद्धत्वात् ॥१२३॥

नमः करेभ्योऽस्तु विधेर्न वास्तु स्पृष्टं धियाप्यस्य न किं पुनस्तैः।
स्पर्शादिदं स्यात्तुलितं हि शिल्पं मनोभुवोऽनङ्गतयानुरूपम् ॥१२४॥

विधेः करेभ्यो नमोऽस्तु यैरीदृशी सृष्टेति गम्यम्। अथवा मास्तु नम इति संबन्धः। किमिति सादरमनुमत्या तेषां नमस्कारो निषिध्यत इत्याह। यत इदं भैमीलक्षणमनुभूयमानं शिल्पमस्य विधेर्धियाप्यमूर्तया बुद्ध्यापि न स्पृष्टम्। किं पुनस्तैः करैः, अपि तु तैः स्पृष्टमपि नैवेत्यर्थः। यतः स्पर्शात्तुलितं स्याद् विसंस्थुलं भवेत्। तर्हि कोऽस्य कर्ता युज्यत इत्याह। मनोभुवः कामस्यानुरूपं योग्यम्। कया?। अनङ्गतया। कामो ह्यनङ्गस्तस्य कर्तृत्वे स्पर्शाभावात्तुलितं न भवतीत्यर्थः। 'विधेः करेभ्यः' इति गौरवाद् बहुवचनं चेष्टाभेदाद् वा ॥१२४॥

उत्क्षिप्य धातुस्तुलिता करेण श्रोणौ किमेषा स्तनयोर्गुरुत्वम् (-वा।)।
तेनान्तरालैस्त्रिभिरङ्गुलीनामुदितमध्यत्रिवलीविलासा: ॥१२५॥

अथवा धातुः करेण किमेषा उत्क्षिप्य समवोत्क्षिप्य तुलिता परिकल्पितासीत्। यतः कीदृशी?। श्रोणौ स्तनयोर्गुरुभारवती। तुलनादेवेदं धत्ते। तेनैव च तुलनेनाङ्गुलीनां चतसृणामन्तरालैर्मध्यभागैः कृत्वा उदीत [214.6] उत्पन्नो मध्ये उदरे त्रिवलीविलासो यस्याः सा तथा। विलासः परिस्फुरणम् ॥१२५॥

निजामृतोद्यन्नवनीतजाड्यमितो क्रमोन्मीलितपीतिमानम्।
कृत्वेन्दुरस्या मुखमात्मनाभून्निद्रालुना दुर्धरमम्बुजेन ॥१२६॥

निजमात्मीयं यदमृतं तत उद्यदुद्गच्छद्यन्नवनीतं, तेन जातमङ्गं यस्यास्तामत एव नवनीतजत्वात् क्रमेणोन्मीलन्नु[1]धमानः पीतिमा यस्यास्तामीदृशीमिमां कृत्वा चन्द्रो-ऽस्या मुखं स्वयमेव सम्पन्नः। यतो निद्राशीलेनाब्जेन कृत्वा निर्मातुमशक्यम्। नव-नीते चिरं धृते पीतत्वमुन्मीलति। अम्बुजस्य निद्रालुता सकलां निशां निमीलनमुप-चारेण संकोचविषयं प्रसिद्धमेव ॥१२६॥

अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन।
अमूनि पुष्पैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥१२७॥

अस्याश्चारु रुचिरः कारुः शिल्पी स मधुर्वसन्त एव श्वासं मलयानिलेन वितेने। अमून्येतादृंशि अङ्गकान्यनुकम्पितान्यङ्गानि पुष्पैः कृत्वा विदधे। वाचं च पिकस्य पञ्चमाख्येन स्वरेण चकार। इयं च सामग्री मधोः स्वाधीनेति तस्यास्याः कारुत्वे चारुत्वम् ॥१२७॥

कृतिः स्मरस्यैव न धातुरेषा नास्या हि शिल्पीतरकारुजेयः।
रूपस्य शिल्पे वयसापि वेधा निर्जीयते स स्मरकिङ्करेण ॥१२८॥

एषा दमयन्ती स्मरस्यैव निर्मितिर्न धातुः। हि यस्मात्। अस्याः शिल्पी निर्माता इतरकारुजेयो न भवेत्। ननु विधिः केनेतरेण कारुणा जित इत्याह। सौन्दर्यस्य विधाने वयसाऽवस्थाविशेषेणापि स जीयते। केन वयसेत्याह। स्मरस्य किङ्करेण दासेन यौवनेनेत्यर्थः। तस्माद्युक्तितः स्मर एव निर्माता अस्या न विधाता ॥१२८॥

गुरोरपीमां भणतोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम्।
श्रमः स्मरस्यैव भवं विहाय मुक्तिं गतानामनुतापनाय ॥१२९॥

एष दमयन्तीनिर्माणलक्षणः स्मरस्यैव श्रमो मदनायासो नान्यस्य। किं कर्तुम्? । गुरोर्बृहस्पतेरप्योष्ठकण्ठमेनां भणद्वर्णयत् निरुक्तिगर्वच्छिदया कृत्वा विनेतुम्। विनीतं सुशिक्षितं कर्तुम्। निश्चिता उक्तिर्निरुक्तिर्निःशेषतया वचनं तत्र यो गर्वोऽभिमानस्तस्य च्छिदा छेदस्तेन बृहस्पतेर्हि ओष्ठकण्ठस्य सर्वेषां पदार्थानां गुणनिर्वचने गर्वोऽस्ति। अस्या गुणसमुद्रस्य तु शीकरमपि निर्वक्तुं न शक्त इति निरुक्तिगर्वस्य च्छेदः।

1. B1. वृध्यमानः

गर्वच्छेदे च विनय आयात एव। न केवलमेतदेव कर्तुं, किन्तु[ये] भवं संसारं विहाय मुक्तिं गताः सन्ति, तेषां पुनरिहागमनं न भवत्येवात्यन्तं कर्मबन्धस्य त्रुटितत्वात् विना च भूम्यवतारं सा कथमिव दर्शन-[१.१५.७]-पात्रं यातु। अतस्तेषामननुतापो यदि वयं भवं विहाय मुक्तिपदमुपगता नाभविष्याम, तदा रमयन्तीदर्शनसुखोपालम्भो दूरे वाऽभविष्यदिति। तान्स्ववशं कामो न तापयति। ते हि तं विजित्य मुक्तिं गताः सन्ति। ओष्ठस्य कण्ठस्योष्ठकण्ठं प्राप्यदूत्वादेकत्वम् ॥१२९॥

आख्यातुमक्षिव्रजसर्वपीतां भैमीं तदेकाङ्गनिखातचक्षुः।
गाथासुधाश्लेषकलाविलासैरलं चकाराननचन्द्रमिन्द्रः ॥१३०॥

[1] गाथैव मृष्टत्वात् सुधा। तस्या आश्लेष आलिङ्गनम्। तत्र या कला [2] चातुरी, तस्या विलासा विभ्रमास्तैः कृत्वा इन्द्र आननचन्द्रमलं चकार। एतद्धि चन्द्रस्य सुष्ठु युज्यते। अथ च [3] गाथायाः श्लेषकलापरानामर्थानां [4] च पृथगवस्थितानां युक्त्या संयोज्य गुम्फनं श्लेषकला, तस्या विलासा विस्फुरणानि, तैः कृत्वा चन्द्रवन्मनोहरं मुखं स्वलङ्कृतं चकार। रुचिरस्य मुखस्य हि श्लेषप्राया प्रसादादिगुणयुक्ता गाथा प्रथममलङ्करणम्। किं कर्तुमेवं चकारेत्याह। अक्षिव्रजेन सहस्रेण दृग्भिः सर्वपीतां निखिलामवलोकितां भैमीमाख्यातुं वर्णयितुम्। कीदृशः? तस्या एकस्मिन्नेवाङ्गे निखातानि वर्णनावसरे [5] समारोपितानि चक्षूंषि येन स तथा प्रथमं नेत्रदशशतीसद्भावात् तेन सा सर्वा किलानखशिखं सदर्पं परिकलिता वर्णनावसरे तु मनस एकाग्रतया नेत्रसहस्रस्यापि वृत्तिरेकस्मिन्नङ्गे स्मितादौ स्थिरीकृतेति भावः ॥१३०॥

स्मितेन गौरी हरिणी दृशैव वीणावती सुस्वरकण्ठभासा।
हेमैव कायप्रभयाङ्गशेषैस्तन्वीमतिक्रामति मेनकापि ॥१३१॥

तदेवैकाङ्गनिखातचक्षुर्गाथासुधाश्लेषकलाविलासालङ्कृतवदनचन्द्रत्वं चन्द्रस्य दर्शयति। इयं भैमी स्मितेन कृत्वा गौरीनामाप्सरसः, दृशा कृत्वा हरिणीनाम, सुस्वरस्य कण्ठस्य भासा रुचा कृत्वा वीणावती नाम, कायस्य प्रभया कान्त्या हेमा नामैव, अङ्गशेषैः शेषाङ्गैः कृत्वा मेनकापि नाकनायिका तन्वीमेतामतिक्रामति। काक्वा अपि तु नैवेत्यर्थः। अथ च द्वितीयोऽर्थः। स्मितेन गौरी गौरवर्णेयं, दृशा हरिणीव हरिणी मृगी साक्षात्, सुस्वरकण्ठभासा वीणावती। वीणा विद्यते यस्याः सेव तथैव

1. Bl. om. गाथैव --- तस्या. 2. Bl. om. चातुरी. 3. Bl. om. गाथायाः 4. Bl. om. --नामर्थानां च पृथगव- 5. Bl. संसारोपितानि.

तत्कार्यकरणात् । कायप्रभया हेतुभूतया सुवर्णमेव अङ्गशेषैः कृत्वा कापि स्त्री मम मत्संबन्धिनी मया दृष्टा श्रुतापि तन्वीं नातिक्रामति लङ्घयति ॥१३१॥

इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन (वाक्छलेन)।
व्याकृत्य मर्त्योचितमर्थमुक्तेराखण्डलस्तस्य नुनोद शङ्काम् ॥१३२॥

आखण्डल एवं स्तुवन् सविधे समीपे स्थितेन शङ्कितवाक्छलेन सता किमयं कथ्य[215.6]-न स्वर्गीय इति विलोकितः सन् । उक्तेः स्ववचनस्य मनुष्यार्हमर्थमभिधेयं पूर्वप्रदर्शितं व्याकृत्य व्याख्याय तस्य नलस्य शङ्कां भ्रान्तिं नुनोदापनयति स्म । छललक्षणं पूर्वं बहुकृत्वः प्रदर्शितमेव ॥१३२॥

एवं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलः[1] सन् ।
किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः ॥१३३॥

अहो चित्रम् । स पुनरिन्द्रः दुष्टं विरुद्धं स्थानिवत् स्थानिवभावं भवनं किमधत्त । दुष्टः स्थानी किमिति बभूवेत्यर्थः । कीदृशः? अनलो नलादन्यो ना पुरुषः सन्, न हि स नलनामा पुरुषोऽस्ति, अपि त्विन्द्रनामा देवः । ननु कार्यार्थं दुष्टेन विरुद्धेनापि भूयत इत्याह । कार्यस्य हेतोरपि गुरुतरस्य कार्यस्य करणादपि नैवं भवितुं युक्तमित्यर्थः । कीदृशः सन्नित्याह । तादृक्कृतव्याकरणः । तादृक् तादृशं साक्षान्नलप्रतीतिकरमेव कृतं विशिष्टमाकरणमाकृतिर्येन स तथा । विहितविशिष्टाकार इत्यर्थः । किं कृत्वा दुष्टं स्थानिवद्भावमधत्तेत्याह । स्वमात्मानमिन्द्रं नैषधादेशं विधाय नैषधस्य आदेशो यस्य नैषधादेशः । इन्द्रो हि स्थानीत्यादेशभूतः । यथा अस्ति धातुः । तस्य चात्मन आदेशो नलः, यथा अस्तेर्भूः । आदेशो हि शत्रुवदादेशिनं विलुप्य तस्य स्थाने भवति । तथेन्द्रेण [illegible] आत्मानं विलोप्य तत्स्थाने नलो भावित इत्यर्थः । एतच्च तस्या युक्तमेव । यदेव इन्द्रः सन् कार्यहेतोरपि मानुषो नलो भवतीति । अथ चार्थान्तरम् । स पुनस्तादृक्कृतव्याकरणस्तादृशविहितशब्दागमः सन्, विद्वान् दुष्टं विरुद्धं स्थानिवद्भावं स्थानिवत्त्वं किमधत्त । यत्र यथा स्थानिवद्भावो न युक्तस्तत्र तथा किमिति कृतवानित्यर्थः । किमर्थं नलः नलसंज्ञकस्य कार्यस्य हेतोरपि नल्विधौ क्रियमाणः स्थानिवद्भावो न युक्तः । अपि तु दुष्टः । अनल्विधावेव[2] क्रियमाणः साधुर्भवेत् । पाणिनीये वर्णविधेर्नल् संज्ञा । अनल्विधिर्वर्णविधिः । पुनरप्यनल्त्वस्य[3] नला संबन्धे प्रकृते नल्विधिरेव भवति । स च वर्णविधिः । तत्र च भवन् स्थानिवद्भावो दुष्टः । स्थानिवदादेशोऽध वर्णविधौ ।

1. ड. नानल: 2. ड. अनिल्वि- 3. ड. -निल्त्यस्य-

अयमर्थस्तु नानल इत्यस्य छलमात्रेण वर्णविधावेवादेशः स्थानिवन्न भवति। यथा 'द्व्यर्थ' इत्यत्र द्वेर्थं इति यकारे कृते दीर्घ आकारे क्रियमाणे यकारो वा आदेशः स्थानिवदेकारस्वरवन्न भवति। अत्र हि वर्णविधेर्विषयः। अत्रादेशः स्थानिवद्भवन् दुष्टो भवेत् ॥१३३॥

इयमियमधिरथ्यं याति नैपथ्यमञ्जु-
-र्विशति विशति वेदीमुर्वशी सैयमुर्व्याः।
इति जनजनितैः सानन्दनादैर्विं-[२१६.a]-जघ्ने
नलहृदि परभैमीवर्णनाकर्णनाप्तिः ॥१३४॥

इयमियमधिरथ्यं रथ्यायां नैपथ्येन वेषेण मञ्जुर्मनोज्ञा सती याति। सेयमुर्व्याम् उर्वशी वेदीं स्वयंवरमण्डपभुवं विशति विशति, सञ्चरति सञ्चरतीति सम्भ्रमे वीप्सा। तद्धावत पश्यत गच्छत गत्वा पश्याम। इत्येवं जनजनितैर्लोककृतैः आनन्द-नादैर्हर्षकलकलैः सा पूर्वोक्ता नलहृदि लग्ना परा उत्कृष्टा भैम्या वर्णना तस्या आकर्णनं श्रवणं तस्याप्तिर्लब्धिर्विजघ्ने विहिता विघ्नितेत्यर्थः ॥१३४॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा-
-काव्ये चारुणि वैरसेनिचरिते सर्गो निसर्गोज्ज्वलः ॥१३५॥

तर्का ऊहप्रधानानि शास्त्राणि तेष्वप्यसमोऽनन्यश्रमो यस्य न परं साहित्ये कवि-कलायां चेति शुभम् ॥१३५॥

शाण्डिल्यनाममुनिवंशकरीरकस्य, श्रीधीरधीरतनयस्य गदाधरस्य।
कॢप्तौ सुधामधुनि नैषधटीकिकायां सर्गोऽयमत्र दशमः परिपूर्यते स्म॥
॥श्रीः॥ इति श्रीनैषधे महाकाव्ये दशमः सर्गः सम्पूर्णतामबीभजत् ॥१०॥